CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

३५T

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ

श्रीभगवच्चन्द्रिका

काजी पुष्पराज

२०१५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रकाशक

काजी पुष्पराज

८।३७० वट्टुटोल, काठमाण्डू

नेपाल

सर्वाधिकार सुरक्षित

प्रथम संस्करण

१०००

मुद्रक

नरेन्द्र यन्त्रालय

काठमाण्डू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



श्री ५ महाराजाधिराज महेन्द्र वीर विक्रम शाह देव नेपाल

नेपालाधिपतिर्देवः श्रीमहेन्द्रो विराजते ।
परसंवित्प्रभापुष्पमिदं तस्मै समर्पये ॥

श्रीमतां सेवकः पुष्पराजः

संवत् २०१५ साल

नरेन्द्रयन्त्रालय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीः

ॐ

यस्येच्छात इदं सर्वं सततं यश्च केवलम् ।
तं नित्यं सच्चिदानन्दं प्रणतोऽस्मि स्वसंविदम् ।
तद्भक्तिसंश्रिताधीतपुस्तकेभ्यो यथो मति ।
संगृहीतमिदं सर्वमात्मज्ञानप्रसादये ।
येन केनापिदोषेण या च काचित्त्रुटिर्भवेत् ।
शोधनीया बुधैर्नूनं ज्ञानविज्ञानयुक्तिभिः ।
पिता माता गुरुर्भूपः सर्वं यत्परिनिष्ठितम् ।
तत्स्वाधिपतये भक्त्या महेन्द्राय समर्प्यते ।
प्रपन्नोऽस्मि सर्वमूलं प्रपन्नाभयदं शिवम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यन्मायया ऽपि विबुधा मुह्यन्ति ज्ञानकाशया ।
यत्प्रभावादहमिदं यत्प्रभावाच्च केवलम् ।
प्रसीदतु प्रभावज्ञः प्रभातीत प्रकाशया ।
सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत ।
तच्छुद्धं विमलं विशोकममृतं सत्यं परं धीमहि ।
स्वप्रकाशानुभवचित्स्पन्दं प्रतिभान्यदिवभानमपि ।
ज्ञातं भामात्रं प्रज्ञानघनं सन्महिम्नि स्वे महीयते ।
ज्ञानमेव ज्ञेयं स्पन्दभानं नान्यत् किञ्च नाज्ञानम् ।
अस्पन्दभानन्दं चित् सन्मात्रं राजते लीनसर्वम् ।
न नामरूपं न सदसद्वा न तेजस्तमः प्रतिभात्मभानम्
चिद्भास्वरूपं स्वच्छानन्दं सजज्ञमात्रमानं द्युत्यतीत भानम् ।

ॐ शान्तिः ॐ शान्तिः ॐ शान्तिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनुक्रमणिका ।

ग्रन्थाः	पृष्ठाङ्काः	ग्रन्थाः	पृष्ठाङ्काः
श्रीमद्भागवतम्	१	गन्धर्वतन्त्रम्	४८
श्रीमद्देवीभागवतम्	२९	कालोत्तरमहातन्त्रम्	४९
श्रीशिव महापुराणम्	३२	कालानलतन्त्रम्	४६
श्रीविष्णु "	३४	अकुलवीर "	५०
श्रीब्रह्मवैवर्त "	३४	कुलानन्द "	५१
श्रीमहाभारतम्	३५	शारदातिलकम्	५१
श्रीमदध्यात्म रामायण	३९	श्रीप्रपञ्चसारतन्त्रम्	५२
श्रीश्रीतन्त्रराजतन्त्रम्	४२	रुद्रयामलम्	५३
ज्ञानार्णव "	४४	ब्रह्मयामलम्	५४
श्री श्री कुलार्णव "	४४	कौलज्ञाननिर्णय	५६
शक्ति सङ्गम "	४६	तारारहस्यम्	५७
श्रीमदुर्मिकौलार्णव	४६	ज्ञानकारिका	५८
कौलरहस्यम्	४७	त्रिपुरारहस्यम्	५८
महानिर्वाणतन्त्रम्	४७	योगिनीहृदयम्	६२
कुलचूडामणि "	४७	विज्ञानभैरव	६३
श्रीकाली विलास "	४८	अमनस्कयोगशास्त्रम्	६३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनुक्रमणिका ।

ग्रन्थाः	पृष्ठाङ्काः
योगदर्शनम्	९४
सांख्य दर्शनम्	९५
विवेक चूडामणि	९५
श्रीयोगवासिष्ठसार	९७
श्रीयोगवासिष्ठ	९८
ब्रह्मसूत्रम्	१०२
सिद्धान्त दर्शनम्	१०३
कौलोपनिषत्	१०४
त्रिपुरामहोपनिषत्	१०५
भावनोपनिषत्	१०५
बह्वृचोपनिषत्	१०६
अरुणोपनिषत्	१०७
कालिकोपनिषत्	१०८
तारोपनिषत्	१०८
अद्वैतभावोपनिषत्	१०८
ईशावास्योपनिषत्	१०९
केनोपनिषत्	१०९
कठोपनिषत्	११०
प्रश्नोपनिषत्	११२
मुण्डकोपनिषत्	११२
माण्डूक्योपनिषत्	११५
तैत्तिरीयोपनिषत्	१२०
ऐतरेयोपनिषत्	१२१
छान्दोग्योपनिषत्	१२२
बृहदारण्यकोपनिषत्	१२३
श्रुतिसिद्धान्तसार संग्रहः	१२८
श्रीमहाविष्णुस्तोत्रम्	१३८
ब्रह्मस्तोत्रम्	१७५
श्रीशिव "	१७८
श्रीदेव्यथर्वशीर्षम्	१७९
परमार्थ	१८०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सांकेतिकाङ्काः क्रमिकाः

पुराणेषु –

स्कन्धः । अध्यायः । श्लोकः

वा अध्यायः वा श्लोकः । श्लोकः

श्रीशिवमहापुराणे विशेषाक्षरसंकेताः

रु – रुद्रसंहिता को – कोटिरुद्रसंहिता

कै – कैलाशसंहिता वा वायवीयसंहिता उत्तरभाग

श्रीमहाभारते –

पर्वः । अध्यायः । श्लोकः

६–भीष्मपर्व श्रीमद्भगवद्गीता. १२– शान्तिपर्व.

८ – श्रीमदध्यात्मरामायणे. उ– उत्तरकाण्डपञ्चमसर्गः

रा – श्रीरामगीता. अंक–श्लोकांकः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तन्त्रेषु–

पटलः	मन्त्रः
वा	वा
उल्लासः	श्लोकः

प. — पटलः

प्र. अ. — प्रथमाधिकारः

शक्तिसङ्गमतन्त्रे–

उ. ता. – उग्रताराखण्ड उ. – उत्तरमतम्

सु – सुन्दरी खण्डः

योगदर्शने – पादः । सूत्रम्

सांख्यदर्शने – अध्यायः । सूत्रम्

अन्यपुस्तकेषु – अध्यायः वा श्लोकः । श्लोकः ।

योगवासिष्ठे–प्रकरणम् । सर्गः । श्लोकः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१ – वैराग्यप्रकरणम् । २ –मुमुक्षुव्यवहारप्रकरणम् ।
३ – उत्पत्तिप्रकरणम् । ४ – स्थितिप्रकरणम् ।

५– उपशमप्रकरणम् ।

६।१-निर्वाणप्रकरणपूर्वार्द्धम् ६।२-निर्वाणप्रकरणोत्तरार्द्धम्

ब्रह्मसूत्रे –

अध्यायः । पादः । सूत्रम्

सिद्धान्तदर्शने-- पाठः । प्रपाठः । सूत्रम्

१ – प्रकृतिपाठः २ – पुरुषपाठः
३ – मुक्तिपाठः ४ – ज्ञानपाठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उपनिषत्सु –

मन्त्रः वा श्रुतिः वा श्लोकः

वा

खण्डः	मन्त्रः
वा	वा
प्रश्नः	श्लोकः
वा	वा
अध्यायः	अनुवाकः
	वा
	खण्ड

वा

अध्यायः	वल्लिः	मन्त्रः
वा	वा	वा
मुण्डकः	खण्डः	श्रुतिः
	वा	वा
	ब्राह्मणः	श्लोकः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

माण्डूक्योपनिषदि— गौ - गौडपादीयकारिका

श्रुतिसिद्धान्तसंग्रहः

अद्व - अद्वयतारकोपनिषत्	अध्या. - आध्यात्मोपनिषत्
अन्न. - अन्नपूर्णा "	अ.ना.- अमृतनादो "
अ.वि. - अमृतविन्दू "	आत्म - आत्मबोधो "
ऐ. - ऐतरेयो "	क. - कठो "
कु. - कुण्डिको "	के. - केनो "
छा. - छान्दोग्यो "	ते. - तेजोबिन्दू "
तै. - तैत्तिरीयो "	त्रिपा.-त्रिपाद्विभूतिनारायणो "
त्रिशि-त्रिशिखिब्राम्हणो "	वरा. - वराहो "
वह्वृ–ब्रह्वृचो- "	बृ.जा. - बृहज्जाबालो "
बृ.आ.-बृहदारण्यको "	द. - दर्शनो
ना. -नादबिन्दू "	नि. - निरालम्बो "

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निर्वा	—	निर्वाणोपनिषत्	यो.कु.	—	योगकुण्डल्यु,,
प.	—	पञ्चब्रह्मो,,	यो.चू.	—	योगचूडामण्यु,,
पै.	—	पैङ्गलो,,	यो.त.	—	योगतत्त्वो ,,
भा.	—	भावनो,,	यो.शि.	—	योगशिखो ,,
म.	—	महो ,,	शा.	—	शारीरको ,,
मं.ब्रा.	—	मण्डलब्राह्मणो,,	शां.	—	शाण्डिल्यो ,,
मां.	—	माण्डूक्यो ,,	सन्.	—	सन्न्यासो ,,
मु.	—	मुक्तिको,,	स.सा	—	सर्वसारो ,,
मुं.	—	मुण्डको ,,	स.र.	—	सरस्वतीरहस्यो,,
मै.	—	मैत्रायण्यु,,			

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीमद्भागवतम्

ॐ नमोभगवते वासुदेवाय।

जन्माद्यस्य यतोऽन्वयादितरत-
श्चार्थेष्वभिज्ञः स्वराट्
तेने ब्रह्म हृदा य आदिकवये
मुह्यन्ति यत्सूरयः।
तेजोवारिमृदां यथा विनिमयो
यत्र त्रिसर्गोऽमृषा
धाम्ना स्वेन सदा निरस्तकुहकं
सत्यं परं धीमहि॥ १।१।१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स एवेदं ससर्जाग्रे भगवानात्ममायया ।
सदसद्रूपया चासौ गुणमय्याऽगुणो विभुः ॥ १।२।३०
यत्रेमे सदसद्रूपे प्रतिषिद्धे स्वसंविदा ।
अविद्ययात्मनि कृते इति तद्ब्रह्मदर्शनम् ॥ १।३।३३
यद्येषोपरता देवी माया वैशारदि मतिः ।
सम्पन्न एवेति विदुर्महिम्नि स्वे महीयते ॥ १।३।३४
स सर्वधीवृत्त्यनुभूतसर्व
आत्मा यथा स्वप्न जनेक्षितैकः ।
तं सत्यमानन्दनिधिं भजेत
नान्यत्र सज्जेद्यत आत्मपातः ॥ २।१।३९
एवं स्वचित्ते स्वत एव सिद्ध
आत्मा प्रियार्थो भगवाननन्तः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तं निर्वृतो नियतार्थो भजेत
संसारहेतूपरमश्च यत्र ॥ २।२।६

विशुद्धं केवलं ज्ञानं प्रत्यक्सम्यगवस्थितम् ।
सत्यं पूर्णमनाद्यन्तं निर्गुणं नित्यमद्वयम् ॥ ५।६।३६

आत्ममायामृते राजन्परस्यानुभवात्मनः ।
नघटेतार्थसम्बन्धः स्वप्नद्रष्टुरिवाञ्जसा ॥ २।६।१

अहमेवासमेवाग्रे नान्यद्यत्सदसत्परम् ।
पश्चादहं यदेतच्च योऽवशिष्येत सोऽस्म्यहम् ॥ २।६।३२

ऋतेऽर्थं यत्प्रतीयेत न प्रतीयेत चात्मनि ।
तद्विद्यादात्मनो मायां यथाभासो यथा तमः ॥ २।६।३३

यथा महान्ति भूतानि भूतेषूच्चावचेष्वनु
प्रविष्टान्यप्रविष्टानि तथा तेषु न तेष्वहम् ॥ २।६।३४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एतावदेव जिज्ञास्यं तत्त्वजिज्ञासुनात्मनः ।
अन्वयव्यतिरेकाभ्यां यत्स्यात्सर्वत्र सर्वदा ॥ २।९।३५

आभासश्च निरोधश्च यतश्चाध्यवसीयते ।
स आश्रयः परंब्रह्म परमात्मेति शब्द्यते ॥ २।१०।७

भगवानेक आसेदमग्र आत्मात्मनां विभुः
आत्मेच्छानुगतावात्मानानामत्युपलक्षणः ॥ ३।५।२३

यदेन्द्रियोपरामोऽथ द्रष्टात्मनि परे हरौ ।
विलीयन्ते तदा क्लेशाः संसुप्तस्येव कृत्स्नशः ॥ ३।७।१३

अनन्यदृष्ट्या भजतां गुहाशयः
स्वयं विधत्ते स्वगतिं परः पराम् ॥ ३।१३।४९

अनादिरात्मा पुरुषो निर्गुणः प्रकृतेः परः ।
प्रत्यग्धामा स्वयंज्योतिर्विश्वं येन समन्वितम् ॥ ३।२६।३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स एष प्रकृतिं सूक्ष्मां दैवीं गुणमयीं विभुः ।
यदृच्छयैवोपगतामभ्यपद्यत लीलया ॥ ३।२६।४

यत्तत्त्रिगुणमव्यक्तं नित्यं सदसदात्मकम् ।
प्रधानं प्रकृतिं प्राहुरविशेषं विशेषवत् ॥ ३।२६।१०

प्रकृतिः पुरुषस्येह दह्यमाना त्वहर्निशम् ।
तिरोभवित्री शनकैरग्नेर्योनिरिवारणिः ॥ ३।२७।२३

मुक्ताश्रयं यर्हि निर्विषयं विरक्तं
निर्वाणमृच्छति मनः सहसा यथाऽर्चिः ।
आत्मानमत्र पुरुषोऽव्यवधानमेक-
मन्वीक्षते प्रतिनिवृत्तगुणप्रवाहः ॥ ३।२८।३५

भूतेन्द्रियान्तःकरणात्प्रधानाज्जीवसंज्ञितात् ।
आत्मा तथा पृथग्द्रष्टा भगवान्ब्रह्मसंज्ञितः ॥ ३।२८।४१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सम्यग्दर्शनया बुद्ध्या योगवैराग्ययुक्तया ।
मायाविरचिते लोके चरेन्न्यस्य कलेवरम् ॥ ३।३१।४८
ज्ञानमात्रं परं ब्रह्म परमात्मेश्वरः पुमान् ।
दृश्यादिभिः पृथग्भावैर्भगवानेक ईयते ॥ ३।३२।२६
ज्ञानमेकं पराचीनैरिन्द्रियैर्ब्रह्मनिर्गुणम् ।
अवभात्यर्थरूपेण भ्रान्त्या शब्दादिधर्मिणा । ३।३२।२८
एकः शुद्धः स्वयंज्योतिर्निर्गुणोऽसौ गुणाश्रयः ।
सर्वगोऽनावृतः साक्षी निरात्मात्मात्मनः परः । ४।२०।७
शास्त्रेष्वियानेव सुनिश्चितो नृणां
क्षेमस्य सध्र्यग्विमृशेषु हेतुः ।
असङ्ग आत्मव्यतिरिक्त आत्मनि
दृढा रतिर्ब्रह्मणि निर्गुणे च या । ४।२२।२१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्त्वं नरेन्द्रजगतामथ तस्थुषां च
देहेन्द्रियासुधिषणात्मभिरावृतानाम् ।
यः क्षेत्रवित्तपतया हृदि विष्वगाविः
प्रत्यक् चकास्ति भगवांस्तमवेहि सोऽस्मि ।। ४।२२।३७

यस्मिन्निदं सदसदात्मतया विभाति ।
माया विवेकविधुतिस्रजिवाहिबुद्धिः ।
तं नित्यमुक्तपरिशुद्धविबुद्धतत्त्वं
प्रत्यूढकर्मकलिलप्रकृतिं प्रपद्ये ।। ४।२२।३८

सव्यापकतयात्मानं व्यतिरिक्ततयात्मनि ।
विद्वान्स्वप्न इवामर्शसाक्षिणं विरराम ह ।। ४।२८।४०

क्षेत्रज्ञ आत्मा पुरुषः पुराणः
साक्षात्स्वयंज्योतिरजः परेशः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नारायणो भगवान् वासुदेवः
स्वमाययात्मन्यवधीयमानः ॥ ५।११।१३

ज्ञानं विशुद्धं परमार्थमेक
मनन्तरं त्वबहिर्ब्रह्म सत्यम् ।
प्रत्यक् प्रशान्तं भगवच्छब्दसंज्ञं
यद्वासुदेवं कवयो वदन्ति । ५।१२।११

स्वस्त्यस्तु विश्वस्य खलः प्रसीदतां
ध्यायन्तु भूतानि शिवं मिथो धिया ।
मनश्च भद्रं भजतादधोक्षजे
आवेश्यतां नो मतिरप्यहैतुकी ॥ ५।१८।९

यत्तद्विशुद्धानुभवमात्रमेकं
स्वतेजसा ध्वस्त गुणव्यवस्थम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रत्यक् प्रशान्तं सुधियोपलम्भनं
ह्यनामरूपं निरहं प्रपद्ये ॥ ५।१९।४

यदोपरामो मनसो नामरूप
रूपस्य दृष्टस्मृतिसंप्रमोषात् ।
य ईयते केवलया स्वसंस्थया
हंसाय तस्मै शुचिसद्मने नमः ॥ ६।४।२६

अहमेवासमेवाग्रे नान्यत्किंचान्तरं बहिः ।
संज्ञानमात्रमव्यक्तं प्रसुप्तमिव विश्वतः ॥ ६।४।४७

मायामात्राणि विज्ञाय तद्द्रष्टारं परं स्मरेत् ॥६।१६।५४॥

उभयं स्मरतः पुंसः प्रस्वापप्रतिबोधयोः ।
अन्वेति व्यतिरिच्येत तज्ज्ञानं ब्रह्म तत्परम् ॥ ६।१६।५६

न ह्यच्युतं प्रीणयतो बह्वायासोऽसुरात्मजाः ।
आत्मत्वात्सर्वभूतानां सिद्धत्वादिह सर्वतः ॥ ७।६।१९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रत्यगात्मस्वरूपेण दृश्यरूपेण च स्वयम् ।
व्याप्यव्यापकनिर्देश्यो ह्यनिर्देश्योऽविकल्पितः॥७।६।२२

केवलानुभवानन्दस्वरूपः परमेश्वरः ।
माययान्तर्हितैश्वर्य ईयते गुणसर्गया ॥ ७।६।२३

मन्ये तदेतदखिलं निगमस्य सत्यं
स्वात्मार्पणं स्वसुहृदः परमस्य पुंसः ॥७।६।२६॥

आत्मा नित्योऽव्ययः शुद्ध एकः क्षेत्रज्ञ आश्रयः ।
अविक्रियः स्वदृग्घेतुर्व्यापकोऽसङ्ग्यनावृतः ॥ ७।७।१९

विकल्पं जुहुयाच्चित्तौ तां मनस्यर्थविभ्रमे
मनो वैकारिके हुत्वा तं मायायां जुहोत्यनु ॥ ७।१३।४३

आत्मानुभूतौ तां मायां जुहुयात्सत्यदृङ्मुनिः ।
ततो निरीहो विरमेत्स्वानुभूत्यात्मनि स्थितः ॥७।१३।४४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ॐ नमो भगवते तस्मै यत एतच्चिदात्मकम् ।
पुरुषायादिबीजाय परेशायाभिधीमहि ॥ ८।३।२

नायं वेद स्वमात्मानं यच्छक्त्याऽहंधिया हतम् ।
तं दुरत्ययमाहात्म्यं भगवन्तमितोऽस्म्यहम् ॥ ८।३।२६

दृष्टं श्रुतमसद्बुद्ध्वा नानुध्यायेन्न संविशेत् ।
संसृतिं चात्मनाशं च तत्र विद्वान्स आत्मदृक् ॥ ६।१६।२०

ईश्वरालम्बनं चित्तं कुर्वतोऽनन्यराधसः ।
माया गुणमयी राजन्स्वप्नवत्प्रत्यलीयत ॥ ६।२१।१७

तथापि भूमन्महिमाऽगुणस्य ते
विबोद्धुमर्हत्यमलान्तरात्मभिः ।
अविक्रियात्स्वानुभवादरूपतो
ह्यनन्यबोध्यात्मतया न चान्यथा ॥ १०।१४।६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एकस्त्वमात्मा पुरुषः पुराणः
सत्यः स्वयंज्योतिरनन्त आद्यः ।
नित्योऽक्षरोऽजस्रसुखो निरञ्जनः
पूर्णोऽद्वयो मुक्त उपाधितोऽमृतः ॥ १०।१४।२३

आत्मानमेवात्मतयाऽविजानतां
तेनैव जातं निखिलं प्रपञ्चितम् ।
ज्ञानेन भूयोऽपि च तत्प्रलीयते
रज्ज्वामहेर्भोगभवाभवौ यथा ॥ १०।१४।२५

विशुद्धविज्ञानघनं स्वसंस्थया
समाप्तसर्वार्थममोघवाञ्छितम् ।
स्वतेजसा नित्यनिवृत्तमाया
गुणप्रवाहं भगवन्तमीमहि ॥ १०।३७।२२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नमो विज्ञानमात्राय सर्वप्रत्ययहेतवे ।
पुरुषेशप्रधानाय ब्रह्मणेऽनन्तशक्तये ॥ १०।४०।२९

आत्मा ज्ञानमयः शुद्धो व्यतिरिक्तोऽगुणान्वयः ।
सुषुप्तिस्वप्नजाग्रद्भिर्मायावृत्तिभिरीयते ॥ १०।४७।३१

येनेन्द्रियार्थान्ध्यायेत मृषा स्वप्नवदुत्थितः ।
तन्निरुन्ध्यादिन्द्रियाणि विनिद्रः प्रत्यपद्यत ॥ १०।४७।३२

यो दुर्विमर्शपथया निजमाययेदं
सृष्ट्वा गुणान्विभजते तदनुप्रविष्टः ।
तस्मै नमो दुरवबोधविहारतन्त्र
संसारचक्रगतये परमेश्वराय ॥ १०।४९।२९

नात्मनोऽन्येन संयोगो वियोगश्चासतः सति ।
तद्धेतुत्वात्तत्प्रसिद्धेर्दृग्रूपाभ्यां यथा रवेः ॥ १०।५४।४६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नमामि त्वाऽनन्तशक्तिं परेशं
सर्वात्मानं केवलं ज्ञप्तिमात्रम् ।
विश्वोत्पत्तिस्थानसंरोधहेतुं
यत्तद्ब्रह्म ब्रह्मलिङ्गं प्रशान्तम् ॥ १०।६३।२५

एकं स्वयंज्योतिरनन्यमव्ययं
स्वसंस्थया नित्यनिरस्तकल्मषम् ।
ब्रह्माख्यमस्योद्भवनाशहेतुभिः
स्वशक्तिभिर्लक्षितभावनिर्वृतिम् ॥ १०।७०।५

प्राणादीनां विश्वसृजां शक्तयो याः परस्य ताः ।
पारतन्त्र्याद्वैसादृश्याद् द्वयोश्चेष्टैव चेष्टताम् ॥१०।८५।६

आत्मा ह्येकः स्वयंज्योतिर्नित्योऽन्यो निर्गुणो गुणैः ।
आत्मसृष्टैस्तत्कृतेषु भूतेषु बहुधेयते ॥ १०।८५।२४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

योऽस्योत्प्रेक्षक आदिमध्यनिधने
योऽव्यक्तजीवेश्वरो
यःसृष्ट्वेदमनुप्रविश्य ऋषिणा
चक्रे पुरः शास्ति ताः ।
यं संपद्य जहात्यजामनुशयी
सुप्तः कुलायं यथा
तं कैवल्यनिरस्तयोनिमभयं
ध्यायेदजस्रंहरिम् ॥ १०।८७।५०

तद्ब्रह्म परमं सूक्ष्मं चिन्मात्रं
सदनन्तकम् ॥ १०।८८।१०॥

कायेन वाचा मनसेन्द्रियैर्वा
बुद्ध्यात्मनावानुसृतस्वभावात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

करोतियद्यत्सकलं परस्मै
नारायणायेति समर्पयेत्तत् ॥११।२।३६

अविद्यमानोऽप्यवभाति हि द्वयो
र्ध्यातुर्धिया स्वप्नमनोरथौ यथा ।
तत्कर्मसंकल्पविकल्पकं मनो
बुधो निरुन्ध्यादभयं ततः स्यात् ॥११।२।३८

सत्त्वंरजस्तम इति त्रिवृदेकमादौ
सूत्रं महानहमिति प्रवदन्ति जीवम् ।
ज्ञानक्रियार्थफलरूपतयोरुशक्ति
ब्रह्मैव भाति सदसच्च तयोः परं यत् ॥ ११।३।३७

नात्मा जजान न मरिष्यति नैधतेऽसौ
न क्षीयते सवनविद् व्यभिचारिणां हि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वत्र शश्वदनपाय्युपलब्धिमात्रं
प्राणो यथेन्द्रियबलेन विकल्पितं सत् ॥११।३।३८

यदिदं मनसा वाचा चक्षुर्भ्यां श्रवणादिभिः ।
नश्वरं गृह्यमाणं च विद्धि मायामनोमयम् ॥ ११।७।७

पुंसोऽयुक्तस्य नानार्थो भ्रमः स गुणदोषभाक् ।
कर्माकर्मविकर्मेति गुणदोषधियो भिदा । ११।७।८

तस्माद् युक्तेन्द्रियग्रामो युक्तचित्त इदं जगत् ।
आत्मनीक्षस्व विततमात्मानं मय्यधीश्वरे । ११।७।९

ज्ञानविज्ञानसंयुक्त आत्मभूतः शरीरिणाम् ।
आत्मानुभवतुष्टात्मा नान्तरायैर्विहन्यसे । ११।७।१०

दोषबुद्ध्योभयातीतो निषेधान्न निवर्तते ।
गुणबुद्ध्या च विहितं न करोति यथार्भकः । ११।७।११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वभूतसुहृच्छान्तो ज्ञानविज्ञाननिश्चयः ।
पश्यन्मदात्मकं विश्वं न विपद्येत वै पुनः । ११।७।१२

आत्मैव ह्यात्मनो गोप्ता निर्विद्येत यदाखिलात् ।
अप्रमत्त इदं पश्येद् ग्रस्तं कालाहिना जगत् । ११।८।४२

मन एकत्र संयुञ्ज्याज्जितश्वासो जितासनः ।
वैराग्याभ्यासयोगेन ध्रियमाणमतन्द्रितः । ११।९।११

यस्मिन्मनो लब्धपदं यदेत
च्छनैः शनैर्मुञ्चति कर्मरेणून् ।
सत्त्वेन वृद्धेन रजस्तमश्च
विधूय निर्वाणमुपैत्यनिन्धनम् ॥ ११।९।१२

तदैवमात्मन्यवरुद्धचित्तो
न वेद किंचिद्बहिरन्तरं वा ॥ ११।९।१३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परावराणां परम आस्ते कैवल्यसंज्ञितः ।
केवलानुभवानन्दसन्दोहो निरुपाधिकः । ११।९।१८
केवलात्मानुभावेन स्वमायां त्रिगुणात्मिकाम् ।
संक्षोभयन्सृजत्यादौ तया सूत्रमरिन्दम ॥ ११।९।१९
तामाहुस्त्रिगुणव्यक्तिं सृजन्तीं विश्वतोमुखम् ।
यस्मिन्प्रोतमिदं विश्वं येन संसरते पुमान् ॥ ११।९।२०
यथोर्णनाभिर्हृदयादूर्णां संतत्य वक्त्रतः ।
तया विहृत्य भूयस्तां ग्रसत्येवं महेश्वरः ॥ ११।९।२१
विलक्षणः स्थूलसूक्ष्माद्देहादात्मेक्षिता स्वदृक् ।
यथाग्निर्दारुणो दाह्याद्दाहकोऽन्यः प्रकाशकः ॥११।१०।८
वैशारदी सातिविशुद्धबुद्धि
धुनोति मायां गुणसंप्रसूताम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गुणांश्च संदह्य यदात्ममेत
　　त्स्वयं च शाम्यत्यसमिद्यथाग्निः ॥११।१०।१३
स्वप्नो यथात्मनः ख्यातिः संसृतिर्न तु वास्तवी ॥११।११।२॥
यो जागरे बहिरनुक्षणधर्मिणोऽर्था
　　न्भुङ्क्ते समस्तकरणैर्हृदि तत्सदृक्षान् ।
स्वप्ने सुषुप्त उपसंहरते स एकः
　　स्मृत्यन्वयात्त्रिगुणवृत्तिदृगिन्द्रियेशः ॥ ११।१३।३२
ईक्षेत विभ्रममिदं मनसो विलासं
　　दृष्टं विनष्टमतिलोलमलातचक्रम् ।
विज्ञानमेकमुरुधेव विभाति माया
　　स्वप्नस्त्रिधा गुणविसर्गकृतो विकल्पः ॥ ११।१३।३४
दृष्टिं ततः प्रतिनिवर्त्य निवृत्ततृष्ण
　　स्तूष्णीं भवेन्निजसुखानुभवो निरीहः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सन्दृश्यते क्व च यदीदमवस्तुबुद्धया
त्यक्तं भ्रमाय न भवेत्स्मृतिरानिपातात् ॥ ११।१३।३५
वाचं यच्छ मनो यच्छ प्राणान्यच्छेन्द्रियाणि च ।
आत्मानमात्मना यच्छ न भूयः कल्पसेऽध्वने ॥ ११।१६।४३
यदेतदात्मनि जगन्मनोवाक्प्राणसंहतम् ।
सर्वं मायेति तर्केण स्वस्थस्त्यक्त्वा न तत्स्मरेत् ॥ ११।१८।२७
गुणदोषदृशिर्दोषो गुणस्तूभयवर्जितः । ११।१९।४५॥
मनोगतिं न विसृजेज्जितप्राणो जितेन्द्रियः ।
सत्त्वसंपन्नया बुद्धया मन आत्मवशं नयेत् ॥ ११।२०।२०
पुरुषेश्वरयोरत्र न वैलक्षण्यमण्वपि ।
तदन्यकल्पनाऽपार्था ज्ञानं च प्रकृतेर्गुणः ॥ ११।२२।११
प्रकृतिर्गुणसाम्यं वै प्रकृतेर्नात्मनो गुणाः ।
सत्त्वं रजस्तम इति स्थित्युत्पत्त्यन्तहेतवः ॥ ११।२२।१२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सत्त्वं ज्ञानं रजः कर्म तमोऽज्ञानमिहोच्यते ।
गुणव्यतिकरः कालः स्वभावः सूत्रमेव च ॥ ११।२२।१३
आत्मनः पितृपुत्राभ्यामनुमेयौ भवाप्ययौ ।
न भवाप्ययवस्तूनामभिज्ञो द्वयलक्षणः । ११।२२।४८
तरोर्बीजविपाकाभ्यां यो विद्वान् जन्मसंयमौ ।
तरोर्विलक्षणो द्रष्टा एवं द्रष्टा तनोः पृथक् ॥ ११।२२।४९
अर्थे ह्यविद्यमानेऽपि संसृतिर्न निवर्तते ।
ध्यायतो विषयानस्य स्वप्नेऽनर्थागमो यथा ॥ ११।२२।५५
तस्मादुद्धव मा भुङ्क्ष्व विषयानसदिन्द्रियैः ।
आत्माग्रहणनिर्भातं पश्य वैकल्पिकं भ्रमम् ॥ ११।२२।५६
तस्मात्सर्वात्मना तात निगृहाण मनो धिया ।
मय्यावेशितया युक्त एतावान्योग संग्रहः ॥ ११।२३।६१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आसीज्ज्ञानमथो अर्थ एकमेवाविकल्पितम् ।
यदा विवेकनिपुणा आदौ कृतयुगेऽयुगे ॥ ११।२४।२
तन्मायाफलरूपेण केवलं निर्विकल्पितम् ।
वाङ्मनोऽगोचरं सत्यं द्विधा समभवद्बृहत् ॥ ११।२४।३
तयोरेकतरो ह्यर्थः प्रकृतिः सोभयात्मिका ।
ज्ञानं त्वन्यतमो भावः पुरुषः सोऽभिधीयते ॥ ११।२४।४
प्रकृतिर्ह्यस्योपादानमाधारः पुरुषः परः ।
सतोऽभिव्यञ्जकः कालो ब्रह्म तत्त्रितयं त्वहम् ॥ ११।२४।१९
आत्मा केवल आत्मस्थो विकल्पापाय लक्षणः ।११।२४।२७,
संपद्यते गुणैर्मुक्तो जीवो जीवं विहाय माम् ॥११।२५।३५॥
जीवो जीवविनिर्मुक्तो गुणैश्चाशयसंभवैः ।
मयैव ब्रह्मणा पूर्णो न वहिर्नान्तरश्चरेत् ॥ ११।२५।३६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आत्मैव तदिदं विश्वं सृज्यते सृजति प्रभुः ।
त्रायते त्राति विश्वात्मा ह्रियते हरतीश्वरः । ११।२८।६

तस्माद्ब्रह्यात्मनोऽन्यस्मादन्यभावो निरूपितः ।
निरूपितेयं त्रिविधा निर्मूला भातिरात्मनि ।
इदं गुणमयं विद्धि त्रिविधं मायया कृतम् । ११।२८।७

आत्माऽव्ययोऽगुणः शुद्धः स्वयंज्योतिरनावृतः ।
अग्निवद्दारुवदचिद्देहः कस्येह संसृतिः । ११।२८।१२

यावद्देहेन्द्रियप्राणैरात्मनः सन्निकर्षणम् ।
संसारः फलवांस्तावदऽपार्थोऽप्यविवेकिनः ।। ११।२८।१२

नयत्पुरस्तादुत यन्न पश्चा
न्मध्ये च तन्न व्यपदेशमात्रम् ।
भूतं प्रसिद्धं च परेण यद्यत् ।
तदेव तत्स्यादिति मे मनीषा ।। ११।२८।२१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अविद्यमानोऽप्यवभासते यो
वैकारिको राजससर्ग एष ।
ब्रह्म स्वयंज्योतिरतो विभाति
ब्रह्मेन्द्रियार्थात्मविकारचित्रम् ॥ ११।२८।२२

एष स्वयंज्योतिरजोऽप्रमेयो
महानुभूतिः सकलानुभूतिः ।
एकोऽद्वितीयो वचसां विरामे
येनेषिता वागसवश्चरन्ति ॥ ११।२८।३५

एतावानात्मसंमोहो यद्विकल्पस्तु केवले ।
आत्मन्नृते स्वमात्मानमवलम्बो न यस्य हि ॥ ११।२८।३६

मामेव सर्वभूतेषु बहिरन्तरपावृतम् ।
ईक्षेतात्मनि चात्मानं यथा खममलाशयः ॥ ११।२९।१२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति सर्वाणि भूतानि मद्भावेन महाद्युते ।
सभाजयन्मन्यमानो ज्ञानं केवलमाश्रितः ॥ ११।२६।१३
सर्वं ब्रह्मात्मकं तस्य विद्ययात्ममनीषया ।
परिपश्यन्नुपरमेत्सर्वतो मुक्त संशयः ॥ ११।२६।१८
मर्त्यो यदा त्यक्त समस्तकर्मा
निवेदितात्मा विचिकीर्षितो मे ।
तदाऽमृतत्वं प्रतिपद्यमानो
मयात्मभूयाय च कल्पते वै ॥ ११।२६।३४
बुद्धीन्द्रियार्थरूपेण ज्ञानं भाति तदाश्रयम् ।
दृश्यत्वाव्यतिरेकाभ्यामाद्यन्तवदवस्तुयत् ॥ १२।४।२२
यत्सामान्यविशेषाभ्यामुपलभ्येत स भ्रमः ।
अन्योन्यापाश्रयात्सर्वमाद्यन्तवदवस्तु यत् ॥ १२।४।२७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यदैवमेतेन विवेकहेतिना

मायामयाहङ्करणात्मबन्धनम् ।

छित्त्वाऽच्युतात्मानुभवोऽवतिष्ठते

तमाहुरात्यन्तिकमङ्ग संप्लवम् ॥ १२।४।३४

मनः सृजति वै देहान्गुणान्कर्माणि चात्मनः ।

तन्मनः सृजते माया ततो जीवस्य संसृतिः ॥ १२।५।६

रजःसत्त्वतमोवृत्त्या जायतेऽथ विनश्यति ॥ १२।५।७॥

न तत्रात्मा स्वयं ज्योतिर्यो व्यक्ताव्यक्तयोः परः ।

आकाश इव चाधारो ध्रुवोऽनन्तोपमस्ततः ॥ १२।५।८

एवमात्मानमात्मस्थमात्मनैवाऽऽमृश प्रभो ।

बुद्ध्यानुमानगर्भिण्या वासुदेवानुचिन्तया ॥ १२।५।९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अहं ब्रह्म परं धाम ब्रह्माहं परमं पदम् ।
एवं समीक्षन्नात्मानमात्मन्याधाय निष्कले ।। १२।५।११
न द्रक्ष्यसि शरीरं च विश्वं च पृथगात्मनः । १२।५।१२।।

परं पदं वैष्णवमामनन्ति तद्
यन्नेति नेतीत्यतदुत्सिसृक्षवः ।
विसृज्य दौरात्म्यमनन्यसौहृदा
हृदोपगुह्यावसितं समाहितैः ।। १२।६।३२

प्रपन्नोऽस्म्यङ्घ्रिमूलं ते प्रपन्नाभयदं हरे ।
यन्माययापि विबुधा मुह्यन्ति ज्ञानकाशया ।। १२।१०।२
तच्छुद्धं विमलं विशोकममृतं सत्यं परं धीमहि । १२।१३।१९।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीमद्देवीभागवतम्

ॐ सर्वचैतन्यरूपां तामाद्यां च धीमहि
बुद्धिं या नः प्रचोदयात् । १।१।१
सर्वं खल्विदमेवाहं नान्यदस्ति सनातनम् ॥ १।१५।६२॥

एकमेवाद्वितीयं वै ब्रह्म नित्यं सनातनम् ।
द्वैतभावं पुनर्याति कालउत्पत्तिसंज्ञके ॥ ३।६।७
चैतन्यं सर्वभूतेषु यत्तद्विद्धि परात्मकम् ।
तेजः सर्वगतं नित्यं नानाभावेषु नारद ॥ ३।७।१२
तं च तां च महाभाग व्यापकौ विद्धि सर्वगौ ।
ताभ्यां विहीनं संसारे न किंचिद्वस्तु विद्यते ॥३।७।१३
या शक्तिः परमात्माऽसौ योऽसौ सा परमा मता ।३।७।१५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न जानाति तयोः सूक्ष्ममन्तरं विरतिं बिना। ३।७।१६॥
ज्ञानरूपं निराकारं निदानं तत्प्रचक्षते। ३।७।३६॥
यदज्ञानाद्भवोत्पत्तिर्यज्ज्ञानाद्भवनाशनम्।
संविद्रूपां च तां देवीं स्मरामः सा प्रचोदयात्॥ ४।१९।१२
चिच्छक्तिः सर्वभूतेषु रूपं तस्यास्तदेवहि। ५।३३।५६॥
ज्ञानं तु द्विविधं प्रोक्तं शाब्दिकं प्रथमं स्मृतम्।
वेदशास्त्रार्थ विज्ञानात्तद्भवेद्बुद्धियोगतः॥ ६।१५।५१
अनुभवाख्यं द्वितीयं तु ज्ञानं तद्दुर्लभं नृप। ६।१५।५२॥
तत्तदा प्राप्यते तस्य वेत्तुः संयोगो यदा भवेत्। ६।१५।५३॥
अहमेवाऽऽस पूर्वं तु नान्यत्किञ्चिन्नगाधिप।
तदात्मरूपं चित्संवित्परब्रह्मैकनामकम्॥ ७।३२।२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अप्रतर्क्यमनिर्देश्यमनौपम्यमनामयम् ।
तस्य काचित् स्वतः सिद्धा शक्तिर्मायेति विश्रुता ॥ ७।३२।३

न सती सा नाऽसती सा नोभयात्मा विरोधतः ।
एतद्विलक्षणा काचिद्वस्तु भूताऽस्ति सर्वदा ॥ ७।३२।४

तस्यां कर्माणि जीवानां जीवाः कालाश्च संचरे ।
अभेदेन विलीनाः स्युः सुषुप्तौ व्यवहारवत् ॥ ७।३२।६

चैतन्यस्य न दृश्यत्वं दृश्यत्वे जडमेव तत् ।
स्वप्रकाशं च चैतन्यं न परेण प्रकाशितम् ॥ ७।३२।१२

संविदेव परं रूपमुपाधिरहितं मम । ७।३६।४४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्री शिवमहापुराणम्

सत्यं ज्ञानमनन्तं च परानन्दस्परंमहः । रु. १।६।११
अद्वितीयमनाद्यन्तमविकाशं चिदात्मकम् । रु. १।६।१२
शक्तिस्तदैकलेनापि स्वैरं विहरता तनुः ।
स्वविग्रहात्स्वयं सृष्टा स्वशरीरानपायिनी ॥ रु१।६।१
परतत्त्वं विजानीहि विज्ञानं परमेश्वरि ।
द्वितीयं स्मरणं यत्र नाहं ब्रह्मेति शुद्धधीः ॥ रु२।२३।१३
चेतोज्ञानभवं नित्यं ज्योतिरूपं निरामयम् ।
जगन्मयं चिदानन्दं द्वैतहीनं निराश्रयम् ॥ रु३।११।७
वस्तुतस्तु स्वयं सर्वं क्रमो हि भासते शुभः ।
अज्ञानं च मतेर्भेदो नास्त्यन्यच्च द्वयम्पुनः ॥ को४३।८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्ञानी च वीजमेव स्यात्प्ररोहो विकृतिर्मता ।
तन्निवृत्तौ पुनर्ज्ञानी नात्र कार्या विचारणा ॥ को४३।१६
सर्वव्यापि प्रकाशात्मा भासरूपी हि चिन्मयः । कं१२।११
आद्या सैका पराशक्तिश्चिन्मयी शिवसंश्रया । वा४।१३
सैका परा च चिद्रूपा शक्तिः प्रसवधर्मिणी ।
विभज्य वहुधा विश्वं विदधाति शिवेच्छया ॥ वा४।१५
शिवेच्छया पराशक्तिः शिवतत्त्वैकतां गताः ।
ततः परिस्फुरत्यादौ सर्गे तैलं तिलादिव ॥ वा४।१८
न हि शक्तिमतश्शक्त्या विप्रयोगोऽस्ति जातुचित् ।
तस्माच्छक्तेः शक्तिमतस्तादात्म्यान्निर्वृतिर्द्वयोः वा७।२१
ज्ञानेन ज्ञेयमालोक्याज्ञानं चापि परित्यजेत् । वा११।५२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीविष्णुमहापुराणम्

तच्च ज्ञानमयं व्यापि स्वसंवेद्यमनौपमम् ॥ १।२२।४२
ज्ञानमेव परं ब्रह्म ज्ञानं बन्धाय चेष्यते ।
ज्ञानात्मकमिदं विश्वं न ज्ञानाद्विद्यते परम् ॥ २।६।५०
विषयेभ्यस्समाहृत्य विज्ञानात्मा मनो मुनिः ।
चिन्तयेन्मुक्तये तेन ब्रह्मभूतं परेश्वरम् ॥ ६।७।६६
प्रत्यस्तमित भेदं यत्सत्तामात्रमगोचरम् ।
वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितम् ॥ ६।७।५३

श्रीब्रह्मवैवर्तमहापुराणम्

यो निर्गुणः स निर्लिप्तः शक्तिभिर्नहि संयुतः ।
सिसृक्षुराश्रितः शक्त्या निर्गुणः सगुणो भवेत् । ३।४२।३६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीमहाभारतम्

अविनाशि तु तद्विद्धि येन सर्वमिदं ततम् । ६।२।१७॥
अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः । ६।२।१८॥
न जायते म्रियते वा कदाचि
न्नायं भूत्वा भविता वा न भूयः ।
अजो नित्यः शाश्वतोऽयं पुराणो
न हन्यते हन्यमाने शरीरे ॥ ६।२।२०
नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः । ६।२।२४॥
निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान् । ६।२।४५॥
यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः ।
आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते ॥ ६।३।१७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

योऽन्तःसुखोऽन्तरारामस्तथान्तर्ज्योतिरेव यः ।
स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति ॥ ६।५।२४

मया ततमिदं सर्वं जगदव्यक्तमूर्तिना ।
मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ॥ ६।९।४

न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम् ।
भूतभृन्न च भूतस्थो ममात्मा भूतभावनः ॥ ६।९।५

अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते । ६।१३।१२॥
ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य धिष्ठितम् । ६।१३।१७॥

यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् ।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ॥ ६।१८।४६

असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः ।
नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति ॥ ६।१८।४९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बुद्ध्या विशुद्धया युक्तो धृत्यात्मानं नियम्य च ।
शब्दादीन्विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च ॥ ६।१८।५१
विविक्तसेवी लघ्वाशी यतवाक्कायमानसः ।
ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ॥ ६।१८।५२
अहंकारं बलं दर्पं कामं क्रोधं परिग्रहम् ।
विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते ॥ ६।१८।५३
ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति ।
समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥ ६।१८।५४
भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः ।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ॥ ६।१८।५५
चेतसा सर्वकर्माणि मयि सन्यस्य मत्परः ।
बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव ॥ ६।१८।५७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मच्चित्तः सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि । ६।१८।५८॥
ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया ॥ ६।१८।६१
तमेव शरणं गच्छ सर्वभावेन भारत ।
तत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम् ॥ ६।१८।६२
अव्यक्तं व्यक्तधर्माणं सगुणं निर्गुणं तथा ।
निर्गुणं प्रथमं दृष्ट्वा तादृग्भवति मैथिल ॥ १२।३०७।४१
बुद्धमप्रतिबुद्धत्वाद् बुध्यमानं च तत्त्वतः ।
बुध्यमानं च बुद्धं च प्राहुर्योगनिदर्शनम् ॥ १२।३०७।४२
ज्ञानं तु प्रकृतिं प्राहुर्ज्ञेयं निष्कलमेव च ।
अज्ञश्च ज्ञश्च पुरुषस्तस्मान्निष्कल उच्यते ॥ १२।३१८।४७
ज्योतिरात्मनि नान्यत्र सर्वजन्तुषु तत्समम् ।
स्वयं च शक्यते द्रष्टुं सुसमाहित चेतसा ॥ १२।३२६।३६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीमदध्यात्मरामायणम्

यदा परात्मात्मविभेदभेदकं
विज्ञानमात्मन्यवभाति भास्वरम् ।
तदेव माया प्रविलीयतेऽञ्जसा
सकारका कारणमात्मसंसृतेः ॥ ७।१८

अनाद्यविद्योद्भवबुद्धिबिम्बितो
जीवप्रकाशोऽयमितीर्यते चितः ।
आत्माधियः साक्षितया पृथक् स्थितो
बुद्ध्या परिच्छिन्नपरः स एव हि ७।४०

चिद्बिम्बसाक्षात्मधियां प्रसङ्गत
स्त्वेकत्रवातादनलाक्तलोहवत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्योन्यमध्यासवशात्प्रतीयते
जडाजडत्वं च चिदात्मचेतसोः ॥ ७।४१

गुरोः सकाशादपि वेदवाक्यतः
संजातविद्यानुभवो निरीक्ष्य तम् ।
स्वात्मानमात्मस्थमुपाधिवर्जितं
त्यजेदशेषं जडमात्मगोचरम् ॥ ७।४२

प्रकाशरूपोऽहमजोऽहमद्वयो
ऽसकृद्विभातोऽहमतीव निर्मलः ।
विशुद्धविज्ञानघनो निरामयः
संपूर्ण आनन्दमयोऽहमक्रियः ॥ ७।४३

सदैव मुक्तोऽहमचिन्त्यशक्तिमा
नतीन्द्रियज्ञानमविक्रियात्मकः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनन्तपारोऽहमहर्निशं बुधै
विभावितोऽहं हृदि वेदवादिभिः ॥ ८।४४
एवं सदात्मानमखण्डितात्मना
विचार्यमाणस्य विशुद्धभावना ।
हन्यादविद्यामचिरेणकारकै
रसायनं यद्वदुपासितं रुजः ॥ ७।४५
विविक्त आसीन उपारतेन्द्रियो
विनिर्जितात्मा विमलान्तराशय ।
विभावयेदेकमनन्यसाधनो
विज्ञानदृक्केवल आत्मसंस्थितः ॥ ७।४६
विश्वं यदेतत्परमात्मदर्शनं
विलापयेदात्मनि सर्वकारणे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्णश्चिदानन्दमयोऽवतिष्ठते
न वेदवाह्यं न च किंचिदान्तरम् ॥ ७।४७

श्रीश्रीतन्त्रराजतन्त्रम्

यन्मनः क्लेशविश्रान्तेः स्थानं निःशेषकल्मषम् ।
सुखास्पदं स्वर्गं विश्वमयं चिद्रूपवेदनात् ॥ ३०।४६
स्वात्मैव देवता प्रोक्ता ललिता विश्वविग्रहा । ३५।१३॥
लौहित्यं तद्विमर्शः स्यादुपाधिरिति भावना ।
सिद्धिस्त्वनन्यचित्तत्वं मुद्रावैभवभावनम् ॥ ३५।१४
उपचाराश्चलत्वेपि तन्मयत्वमप्रसक्तता ।
प्रयोगास्तु विकल्पानां हेतोः स्वात्मनि नाशनम् ॥ ३५।१५
यज्ज्ञानमिदमोज्ञानं यज्ज्ञानमहमस्तता ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वयोरपि च यज्ज्ञानं तज्ज्ञानं विद्धि मे वपुः ॥ ३६।११

स्थिरः स्वात्मप्रकाशः स्यान्नित्योऽप्रतिभटो महान्॥ ३६।१३॥

त्वन्मयी धीः समाख्याता मन्मयी चिदुदीरिता।

उभयैक्याद्विवेकात्मा जीवोऽन्यस्तु विवेकवान् ॥ ३६।३५

तस्यास्तु बुद्धेर्यो वेत्ति याथात्म्यं विकृतिरपि।

सामर्थ्यं स्वाविभेदित्वं सिद्धेः प्राप्यफलानि च ॥ ३६।३६

योगी ज्ञो ब्रह्मविज्ञानी शिवयोगी तथात्मवित्।

तेनैव विहितं सर्वं प्रपञ्चात्मैक्यविग्रहम् ॥ ३६।३७

स्वात्मनस्तु मनोवृत्त्या विषयग्रहणाय वै।

सृष्टानि भूतशक्त्यात्मविग्रहाणीन्द्रियाणि तु ॥ ३६।३८

भूतात्मबुद्धिसंघातशक्तिचैतन्यजृम्भणम्।

प्राणास्तत्साक्षिभूतो हि जीवस्तत्त्वात्मकः परः ॥ ३६।३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्ञानार्णवतन्त्रम्

पराहन्तामये सर्वज्ञानदीपविजृम्भिते ।
संविदग्नौ हुनेद्देवी प्रपञ्चहविरुत्कटम् ॥ २१।२५
निष्प्रपञ्चो यदा देवि जायते मन्त्रवित्तमः ।
तदा सच्चिन्मयः साक्षात्केवलं ब्रह्मसाधकः ॥ २१।३३
परमात्मस्वरूपेयं विश्वस्पन्दनरूपिणी । २४।७८॥
निष्प्रपञ्चं निराभासं केवलं ब्रह्मसत्कलम् । २४।८७॥

श्रीश्रीकुलार्णवतन्त्रम्

विकृतिं मनसो हित्वा यदोल्लासः प्रवर्तते ।
तदा तु देवताभावं भजन्ते योगिपुङ्गवाः ॥ ८।७५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वोत्तीर्णा सदाऽहन्ता सामरस्य समाकृतिः । ८।८६॥

नोदेति नास्तमभ्येति न वृद्धिं याति न क्षयम् ।

स्वयं विभात्यथान्यानि भासयन्साधनं विना ॥ ६।६

अनन्तं गतभारूपं सत्तामात्रमगोचरम् ।

मनसा मात्र संवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितम् ॥ ६।७

नकिञ्चिच्चिन्तनादेव स्वयं तत्त्वं प्रकाशते ।

स्वयं प्रकाशिते तत्त्वे तत्क्षणात्तन्मयो भवेत् ॥ ६।१०

देहाभिमाने गलिते विज्ञाते परमात्मनि ।

यत्र यत्र मनो याति तत्र तत्र समाधयः ॥ ६।२३

स्वयं वेद्ये परेतत्त्वे स्वात्मानं वेत्ति निश्चलः । १३।११६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शक्तिसंगमतन्त्रम्

परब्रह्मात्र प्रकृतिः प्रतिबिम्बस्वरूपिणी ।
भावनावशतो जातो ब्रह्मरूपः सनातनः ॥ उ. ता. १
चिदानन्दस्वरूपाख्यं शिवशक्त्यात्मकं महः । उ. १
सामरस्यरसो ब्रह्म स एवात्मा प्रकीर्तितः ॥ उ. ११
आनन्दान्मादनादात्मा ज्ञानात्मपरमात्मवित् ।
विज्ञानात्मा भवेद्देवी सकृज्जीवस्य दर्शकः ॥ उ. ११
ब्रह्मरन्ध्रे तु देवेशि सर्वेषां लयमाचरेत् । छ. ५।३०॥

श्रीमद्दामिकालार्णवे

शिवशक्त्यात्मविभवं शिवशक्तिलयोद्भवम् ।
निस्तत्त्वतत्त्वगहनं शाश्वतं तु निरञ्जनम् ॥ प्र. अ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कौलरहस्यम्

परब्रह्म च प्रकृतिः प्रतिविम्बस्वरूपिणी । १।३२
विकृतिं मनसो हित्वा यदोऽल्लासः प्रवर्तते ।
तदा तु देवताभावं भजन्ते योगिपुङ्गवाः ।। प. २०
निर्वाणं च महेशानि परं ब्रह्मात्मतामता । प. २४

महानिर्वाण तन्त्रम्

सदैकरूपश्चिन्मात्रो विकारपरिवर्जितः । १४।१३०।।
ज्ञानमात्मैव चिद्रूपो ज्ञेयमात्मैव चिन्मयः ।
विज्ञाता स्वयमेवात्मा यो जानाति स आत्मवित्।।१४।१३६

कुलचुडामणि तन्त्रम्

ब्रह्मोहं स्फुरत (स्फुरित) प्रभम् । ७।८०।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीकालीविलासतन्त्रम्

निर्गुणस्त्वं हि सगुणः कार्यकारणतत्परः । २४।१६॥

गन्धर्वतन्त्रम्

ब्रह्मचिन्तोद्भवानन्द निवृत्तवाह्यचित्तता । ३४।८७॥

स्वबोधे नान्यबोधेच्छा बोधरूपस्य चात्मनः । ३६।२६॥

यत्प्रकाशात्मकं सर्वं तत्त्वं केवलतां गतम् ।

विमर्श विनिसंप्राप्तमित्येषा तात्त्विकी स्थितिः ॥ ४१।५२

सिसृक्षोः प्रथमः स्पन्दः शिवतत्त्वं प्रभोः स्मृतम् । ४१।५६

इच्छैवास्यापरिम्लाना शक्तितत्त्वमुदङ्कुशम् । ४१।६०॥

संकोचयन्परामर्शी सामान्यस्पन्दकेवलम् ।

अहमि प्रलयं कुर्वन्निदमः प्रतियोगिनः ।

पराक्रमपरो भुङ्क्ते स्वभावमशिवापहम् ॥ ४१।६१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम् ।
मयि सर्वं लयं याति तद्ब्रह्माद्वयमस्म्यहम् ॥ ४२।५३

कालोत्तरमहातन्त्रम्

ज्ञानिज्ञातृतथाज्ञेयव्यतिरिक्ताय वै नमः ।
ज्ञप्तिमात्रस्वरूपाय आनन्दब्रह्मणे नमः ॥ प१ ।
कारणेच्छा प्रवृत्तित्वात्परस्तस्मान्महेश्वरः ।
संविद्रूपात्मकं विद्धि क्रियाकालविवर्जितम् ॥ प. ६१

कालानलतन्त्रम्

अहं देवो न चान्योऽस्मि ब्रह्मैवाहं न शोकभाक् ।
सच्चिदानन्दरूपोहमात्मानमिति चिन्तयेत् ॥ प. १०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अकुलवीरतन्त्रम्

भावाभावविनिर्मुक्त उदयास्तमवर्जितः ।
स्वभावमतिमतं शान्तं मनो यस्य मनोमयम् ॥ १।१४

कौलमार्गे द्वयो सन्ति कृतका सहजा तथा ।
कुण्डली कृतका ज्ञेया सहजा समरसेस्थिता ॥ २।४३

पदव्यञ्जननिर्मुक्तं विमलं सततोदितम् ।
तल्लीने तन्मयात्मानं विन्दते शाश्वतं पदम् ॥ २।७३

चिन्तातीतं भवेत्सोहि योगसंयोगवर्ज्जितम् ।
निर्वाणं वासनाहीनं तृप्तात्मा च निरामयः ॥ २।७४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कुलानन्दतन्त्रम्

अभावं भावयेद्देवि सर्वभावविवर्जितम् ।
चित्तं तत्र स्थितं कृत्वा खमध्ये विनियोजयेत् ॥ ५७
भावयेत् समरसं देवि प्रभुभृत्यं विचक्षणः । ५८॥

शारदातिलकम्

निर्गुणः सगुणश्चेति शिवो ज्ञेयः सनातनः ।
निर्गुणः प्रकृतेरन्यः सगुणः सकलः स्मृतः ॥ १।६
सच्चिदानन्दविभवात्सकलात्परमेश्वरात् ।
आसीच्छक्तिस्ततो नादो नादाद्बिन्दुसमुद्भवः ॥ १।७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिक्कालादिविवर्जिते परशिवे
चैतन्यमात्रात्मके ।
शून्ये कारणपञ्चकस्य विलयं
नीते निरालम्बने ।
आत्मानं विनिवेश्य निश्चलधिया
निर्लीनसर्वेन्द्रियो ।
योगी योगफलं प्रयाति सुलभं
नित्योदितं निष्क्रियम् ॥ २५।८७

श्रीप्रपञ्चसारतन्त्रम्

चित्तात्मैक्यधृतस्य प्राणस्य
स्यात्संहृतिः स्थानात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रत्याहारो ज्ञेयश्चैतन्य-
युतस्य सम्यगनिलस्य ॥ १६।२१

सत्तामात्रं शुद्धं नित्यमपि
निरञ्जनञ्च यत्प्रोक्तम् । १६।२३॥

तत्प्रविचिन्त्य च तस्मि
श्चित्तलयः स्यात्समाधिरुद्दिष्टः १६।२४॥

रुद्रयामलम्

विवेक संभवं ज्ञानं शिवज्ञानप्रकाशकम् । १।१५५॥
मनः करोति सर्वाणि धर्मकर्माणि सर्वदा ।
यत्र गच्छति स श्रीमान्तत्र वायुश्च गच्छति ॥ २६।१२८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मनोविकाररूपन्तु एकमेव न संशयः ।
अज्ञानिनां हि देवेश ब्रह्मणो रुपकल्पना ॥ २६।१५

चिच्छक्तौ परमात्मानं भावयित्वा पुनः पुनः । ६२।४२॥
आत्ममग्नं तत्र पदे कृत्वा चिन्तामणिं भजेत् । ६२।४३॥

ब्रह्मयामलम्

योऽसावचिन्त्यमित्याहुः शिवः परमकारणः ।
निःसंज्ञो निर्विकारश्च व्यापी शान्तस्तथैव च ।
निःस्वभावो महादेवि क्रियाकारणवर्जितः ।
निष्कलो निर्विकल्पन्तु अरूपो गुणवर्जितः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निर्ममो निरहङ्कार अद्वैतपदसंस्थितः ।
योगिन्यं ध्यानगम्योसौ ज्ञानरूपो महायसे।
निराचारपदावस्थः संज्ञामात्रः प्रभुः परः ।
तस्यापरो ज्योतिरूपसर्वानुग्रहकारकः ।
व्यापी हृद्व्यक्तरूपी च अनेनकको महात्मनः ।
तस्य शक्तिर्महादेवि स्वभावोत्था अकृत्रिमा ।
ज्योत्स्नारूपो स्वरूपेण स्फाटिकस्यैव रश्मयः ।
तस्येच्छानिर्गताशक्तिर्ज्ञानरूपा मनोन्मनी ।
समस्तां सृजते देवि शिवेच्छासववर्त्तिनी । प. १
उन्मनं धलयं यात्रःशून्यरूपं विचिन्तयेत् । प ८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कौलज्ञाननिर्णयः

शिवमध्ये गता शक्तिः क्रियामध्ये स्थितः शिवः।
ज्ञानमध्येक्रिया लीना क्रिया लीयति इच्छया ॥ २।६
इच्छाशक्तिर्लयं याति यत्र तेजः परः शिवः। २।७॥
यत्र दृष्टिर्मनस्तत्र भूतेन्द्रियमपुद्गलः। ३।२॥
स्वशक्तिर्जीवभूतानि दृष्टिर्लक्षैर्लयं गता। ३।३॥
स्वातन्त्रमव्जमचलं सर्वव्यापी निरञ्जनम्। ३।६॥
तस्येच्छया भवेत् सृष्टिर्लयं तत्रैव गच्छति।
तेन लिङ्गं तु विख्यातं यत्र लीनं चराचरम् ॥ ३।१०
अखण्डमण्डलं रूपं निर्विकारं सनिस्कलम्। ३।११॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हृदिस्थञ्च मनः कृत्वा यावदुन्मनतां गतः । ६।२७॥
आत्मानमात्मनाज्ञात्वा आत्मा वै कायरूपिणः ।
आत्मनश्चापरो देवि येन ज्ञातं स योगिराट् ॥ १७।३६
स शिवः प्रोच्यते साक्षात्समुक्तो मोचयेत् परः ।
सुविशुद्धः सदा देवि पङ्कस्थमिव पङ्कजम् ॥ १७।३७
अनादिनिधना शक्तिरिच्छा नाम शिवोद्भवा । २०।१०॥

ताराहस्यम्

न वस्तु प्रकृतिश्चैव न पुमान्परमेश्वरः ।
तयोः समरसं ज्ञानं वस्तुतत्त्वं महेश्वरः ।
उभयोः समवायस्तु वस्तुतत्त्वं परं पदम् ।
ज्ञप्तिज्ञेयविभागेन ज्ञायतां भैरवेश्वरः । प. १२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्ञानकारिका

संसारार्णवनिर्मुक्तं कल्पनातीतगोचरम् ।
निर्विकल्पं सदा ज्ञानं कथितं ज्ञानकारिकम् ॥ ७।१८

त्रिपुरारहस्यम्

संकल्प एव स्वातन्त्र्यं चितेरुच्छूनतीर्यते ।
असंकल्पदशायां सा चितिः स्वच्छैकरूपिणी ॥ ११।६६
चिति विचित्रान्यभावैरुपरक्तापि भासिनी ।
स्वरूपादप्रच्युतैवाऽऽदर्शवल्लेशतोपि हि। ॥ ११।६२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एवं त्रिधैकरूपाऽपि चितिः स्वातन्त्र्यहेतुतः।
स्वान्तर्विभासयेद्बाह्यमादर्शे गगनं यथा। १४।५८

संवेदनं सत्यमेकं संवेद्यं तत्र कल्पितं।
आदर्शनगरप्रख्यं मृषैव प्रविभावितम् ॥ १५।४

अहं बुद्धिं न व्यतीत्य तिष्ठत्येषा पराचितिः।
तस्माच्चितिः सर्ववेत्री त्वमष्टावक्र तत्त्वतः ॥ ६१।२५

मनसस्तु द्विधाऽवस्था प्रकाशामर्शभेदतः। १६।६४॥
बहिरर्थेषु विश्रान्तिर्या प्रकाशः स उच्यते।
यस्तद्विचारः स्वस्मिन् वै स विमर्श उदाहृत ॥ १६।६५

प्रकाशो निर्विकल्पः स्याद्वस्तुनामविभेदतः।
विमर्शः शब्दसंभेदाद्विभेदात्सविकल्पकः ॥ १६।६

अनन्तमितभारूपोऽहं सुपूर्णो निरञ्जनः। १७।१०५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निर्विकल्पाख्यविज्ञानं ज्ञानमात्रं निजं वपुः ॥ १७।११०॥
मनसा वेद्यते वेद्यं मनसोऽतो न वेद्यता ॥ १८।३॥
तथा च वेद्यनिर्मुक्तं मनोऽप्यस्तीति सम्भवेत् ।
तन्मनो वेद्यनिर्मुक्तं वित्तिरित्यभिधियते ॥ १८।४
उपलब्धिस्वरूपत्वाद्वित्तिर्वै सा सदा । १८।५
चितिस्वरूपः स्वात्मैव तत्तद्भावात्मना सदा । १८।४०॥
भासते स्वाच्छन्द्यशक्त्या नाधिकं विद्यते क्वचित् ।१८।४१॥
एतावदेव स्वातन्त्र्यं यतः शक्तिर्हि तन्मयो १।६८॥
चला चितिर्मनोनाम्नी निश्चलात्मस्वरूपिणी । १८।११७॥
वेद्यहीना भवेद्वित्तिर्बाधितस्य विभासनात् ।
अमनस्कस्य सुतरां यतः सा चोन्मनी दशा ॥ १६।११६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्ञानं तदेव ही भवेद्यत्रेदं भासते जगत् ।
सङ्कल्पाद्व्यवहारो हि ज्ञाने सर्वं प्रकाशते ॥ २२।१२

असङ्कल्पेन तद्रूपमनुलक्ष्य धिया सकृत् ।
कृतार्थो बन्धनिर्मुक्तो भवतीति सुनिश्चयः ॥ २२।१३

ज्ञस्य प्रमैव तज्ज्ञानमज्ञस्य तु भ्रमात्मकम् ।
ज्ञानिनां ज्ञानमेव स्यात्सर्वोऽपि व्यवहारकः ॥ २२।२१

सर्वानुस्यूतसंवित्तिमात्रात्मा भाति सर्वतः । २२।६४॥

पूर्णविज्ञानमेतत्स्यात्सङ्कोचपरिवर्जनात् ।
दृगेव दृश्यतां प्राप्तं स्वमाहात्म्यप्रकर्षतः २२।१०३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

योगिनीहृदयम्

जाग्रत्स्वप्नसुषुप्त्याख्यतुर्यरूपाण्यमूनि तु ।
अतीतन्तु परन्तेजः स्वसंविदुदयात्मकम् ।। १।४९
स्वेच्छाविश्वमयोल्लेखखचितं विश्वरूपकम् ।
चैतन्यमात्मनोरूपं निसर्गानन्दसुन्दरम् ।। १५०
इच्छारूपं परन्तेजः सर्वदा भावयेद्बुधः । १।७२।।
प्रकाशते महातत्त्वं दिव्यक्रीडारसोज्ज्वले ।
निरस्तसर्वसङ्कल्पविकल्पस्थितिपूर्वकः । २।७६
अहन्तेदन्तयोरैक्यं भावयन् विहरेत्सुखम् । ३।२०१।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विज्ञानभैरवः

निराधारं मनः कृत्वा विकल्पान्न विकल्पयेत् ।
तदात्मपरमात्मत्वे भैरवो मृगलोचने ॥ ११८

ज्ञानप्रकाशकं सर्वं सर्वेणात्मा प्रकाशकः ।
एकमेकस्वभावत्वाज्ज्ञानं ज्ञेयं विभाव्यते ॥ १३७

अमनस्कयोगशास्त्रम्

मनोदृश्यमिदं सर्वं यत्किञ्चित्सचराचरम् ।
मनसोप्युन्मनीभावेऽद्वैतभावं प्रकल्पते ॥ २।८०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ओँकारं विविधैर्विचित्रकरणैः
प्रायश्च वायोर्जय
स्तेजश्चिन्तनमन्तरालकमले
शून्याम्बरालम्बनम् ।
त्यक्त्वा सर्वमिदंकरान्तरगतं
मत्वा मनोविभ्रमं
देहातीतमवाच्यमेकममन
स्कत्वं बुधैः सेव्यतां ॥ २।१११

योगदर्शनम्

योगश्चित्तवृत्तिनिरोधः । १।२
तदा द्रष्टुः स्वरूपेऽवस्थानम् । १।३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सांख्यदर्शनम्

निर्गुणत्वमात्मनोऽसङ्गत्वादिश्रुतेः । ६।१०

प्रकृतेराद्योपादानतान्येषां कार्यत्वश्रुते । ६।३२

विमुक्तबोधान्नसृष्टिः प्रधानस्य लोकवत् । ६।[illegible]

यद्वा तद्वा तदुच्छित्तिः पुरुषार्थ
स्तदुच्छित्तिः पुरुषार्थः । ६।७०

विवेक चूडामणिः

सत्यंज्ञानमनन्तं ब्रह्म विशुद्धं
परं स्वतः सिद्धम् ।
नित्यानन्दैकरसं प्रत्यगभिन्नं
निरन्तरं जयति ॥ ४।२४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ब्रह्मप्रत्ययसंततिर्जगदतो
ब्रह्मैव सत्सर्वतः
पश्याध्यात्मदृशा प्रशान्तमनसा
सर्वास्ववस्थास्वपि ।
रूपादन्यदवेक्षितं किमभित
श्चक्षुष्मतां दृश्यते
तद्वद्ब्रह्मविदः सतः किमपरं
बुद्धेर्विहारास्पदम् ॥ ३८

एषः स्वयंज्योतिरनन्तशक्ति
रात्माप्रमेयः सकलानुभूतिः
यमेव विज्ञाय विमुक्तबन्धो
जयत्ययं ब्रह्म विदुत्तमोत्तमः ॥ ६।१६

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीयोगवासिष्ठसार

सर्गश्चित्स्पन्दमात्रात्मा सम्यग्दृष्टौ विलीयते ।
उदेत्यसम्यग्दृष्टौ तु रज्ज्वां सर्पभ्रम था ॥ २।११

येनेदं वेत्सि तज्ज्ञात्वा कुरु प्रत्यङ्मुखं मनः ।
ततः प्रकाशरूपत्वं द्रक्ष्यसि स्फुटमात्मनः ॥ ८।२

या चितिः सर्वभूतानामुदयव्ययसाक्षिणी ।
तां चितिं पश्यतावस्थां पूर्णानन्दघनामृतम् ॥ १०।२७

यदस्पन्दं शिवं शान्तं यस्यान्तर्जगतः स्थितिः ।
स्पन्दास्पन्दविलासात्मा स एकोऽत्र चिदाकृतिः ॥ १०।२९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्रीयोगवासिष्ठः

यतः सर्वाणि भूतानि प्रतिभान्ति स्थितानि च।
यत्रैवोपशमं यान्ति तस्मै सत्यात्मने नमः ॥ १।१।२
ज्ञाताज्ञानंतथाज्ञेयं द्रष्टादर्शनदृश्यभूः ।
कर्ता हेतुः क्रिया यस्मात्तस्मै ज्ञप्त्यात्मने नमः ॥ १।१।२
स्फुरन्ति सीकरा यस्मादानन्दस्याम्बरेऽवनौ ।
सर्वेषां जीवनं तस्मै ब्रह्मानन्दात्मने नमः ॥ १।१।३
भ्रमस्य जागतस्यास्य जातस्याकाशवर्णवत् ।
अपुनः स्मरणं मन्ये साधो विस्मरणं वरम् ॥ १।३।२
दृश्यं नास्तीति बोधेन मनसो दृश्यमार्जनम् ।
संपन्नं चेत्तदुत्पन्ना परा निर्वाणनिर्वृतिः ॥ १।३।६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अविच्छिन्नचिदात्मैकः पुमानस्तीह नेतरत् ।
स्वसङ्कल्पवशाद्बद्धो निःसङ्कल्पश्च मुच्यते । २।१।२३
यथा संवेदनं चेतस्तथा तत्स्पन्दमृच्छति ।
तथैव कायश्चलति तथैव फलभोक्तृता । २।७।५
अशुभेषु समाविष्टं शुभेष्वेवावतारयेत् ।
प्रयत्नाच्चित्तमित्येष सर्वशास्त्रार्थसंग्रहः ॥ २।७।१२
अचेत्यचित्प्रकाशात्मा विज्ञानात्मा निरामयः ॥ २।१७।४२
चित्तं हि प्रतिभासात्म यश्च तत्प्रतिभासनम् ।
तदिदं भाति देहादि स्वान्तं नान्यास्ति देहदृक् ॥ ३।६५।२०
चित्तमात्मचमत्कारं तच्च तत्कुरुते स्वतः ३।६१।२१॥
सर्वशक्तेरनन्तस्य विलासो हि मनो जगत् । ३।१०६।२५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वशक्तेर्विचित्रा हि शक्तयः शतशो विधेः।
यद्विवेकीमनोऽप्येष विमोहयति मायया ॥ ३।१०६।२६

विज्ञानात्मा शासिता विश्वबीजं
ब्रह्मैवालं स्वं चिदाकाशमात्रम्।
यस्माज्जातं यत्तदेवेति विद्या
द्वेद्यं स्वान्तर्बोधसंबोधमात्रम् ४।३।२४

चिच्चिनोति चितं चेत्यं तेनेदं स्थितमात्मनि ।४।३६।२०॥

किञ्चित्क्षुभितरूपा सा चिच्छक्तिश्चिन्महार्णवे।
तन्मयी चित्स्फुरत्यच्छा तत्रैवोर्मिरिवार्णवे ॥ ४।४२।११

भावयन्नात्मनात्मानं चिद्रूपेणैव चिन्मयम्।
ऋजूज्ज्वलमये ह्यात्मा स्वयमात्मनि जृम्भते ॥ ५।५।४२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वैराग्यात्कारणाभ्यासाद्युक्तितो व्यसनक्षयात् ।
परमार्थावबोधाच्च राध्यन्ते प्राणवायवः ॥ ५।१३।८५

चिन्तनं वृत्तिरित्युक्तं वर्तते चित्तमाश्रया ।
चित्तवृत्तिमतो ह्याशां त्यक्त्वा निश्चित्ततां व्रज ॥ ५।२१।२८

चिच्चेत्यकलनाबन्धस्तन्मुक्तिर्मुक्तिरुच्यते ।
चिदचेत्याखिलात्मेति सर्वसिद्धान्तसंग्रहः ॥ ५।२६।१३

विचित्राः शक्तयः स्वस्थसमया निर्विकारया ।
चिता क्रियन्ते परया कलाकलनयुक्तया ॥ ५।३४।६०

विकल्पहीना चित्सर्वा पदार्थशतदृष्टिषु ।
सममेवाभिपतति प्रभा प्राभाकरी यथा ॥ ५।३४।६१

तत्त्वावबोध भगवन्सर्वाशातृणपावकः ।
प्रोक्तः समाधिशब्देन न तु तूष्णीमवस्थितिः ॥ ५।६२।८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथेदं बृंहिताकारं बृहद्बृहदवस्थितम् ।
ज्ञानादस्तमितद्वित्वं भवात्मैव त्वमात्मना ॥ ५।७६।११

हृदि संवेद्यमाप्यैव प्राणस्पन्दोऽथ वासना । ५।९१।६४॥
उदेति तस्मात्संवेद्यं कथितं बीजमेतयोः ।
संवेद्यसंपरित्यागात्प्राणस्पन्दनवासने ॥ ५।९१।६५

समूलं नश्यतः क्षिप्रं मूलच्छेदादिव द्रुमः ।
संविदं विद्धि संवेद्यं बीजं धीरतया विना ॥ ५।९१।६६

न संभवति संवेद्यं तैलहीनस्तिलो यथा ।
न बहिर्नान्तरे किंचित्संवेद्यं विद्यते पृथक् ॥ ५।९१।६७
संवित् स्फुरन्ती संकल्पात् संवेद्यं विद्यते स्वतः ।
स्वप्ने यथात्ममरणं तथा देशान्तरस्थितिः ॥ ५।९१।६८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वचमत्कारयोगेन संवेद्यं संविदस्तथा ।
स्ववेदनं स्वसंकल्पात्संविदो यत्र वर्तते ॥ ५।९१।६९

विचारोत्थात्मविज्ञानं ज्ञानमङ्ग विदुर्बुधाः ।
ज्ञेयं तस्यान्तरेवास्ति माधुर्यं पयसो यथा ॥ ५।९३।२

सम्यग्ज्ञानसमालोकः पुमान्ज्ञयमयः स्वयम् । ५।९३।२२॥

यन्नास्ति तस्य सद्भाव प्रतिपत्तिरुदाहृता ।
मायेति सा परिज्ञानादेव नश्यत्यसंशयम् ॥ ६।१-३।२०

यत्र प्राणो ह्यपानेन प्राणेनापान एवच । ।६।१-२५।५७॥
निगीर्णौ बहिरन्तश्च देशकालौ च पश्यतो ।६।१-२५।५८॥

एतच्चदात्मनो रूपं शुद्धैषा परमैव चित् ।
एतच्चत्सदा भासमेतत्प्राप्य न शोच्यते । ६।१-२५।६०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri Funding: MIDF

प्राणापानरथारूढं प्राणापानमनाततम् ।
यच्छक्तिरूपं शक्तीनां तच्चित्तत्त्वमुपास्महे । ६।१-२५।७१

अकृत्रिममनाद्यन्तं देवनं देव उच्यते । ६।१-२६।१२१॥

आकारादिपरिच्छिन्ने मिते वस्तुनि तत्कुतः ।
अकृत्रिममनाद्यन्तं देवनं चिच्छिवं विदुः । ६।१-२६।१२२

चिदस्ति हि शरीरेह सर्वभूतमयात्मिका ।
चलोन्मुखा मकैका तु निर्विकल्पा परास्मृता ।६।१-३०।६७

क्रियोन्मुखव्व सङ्कल्पात्सङ्कल्पो मननक्रमः ।
मननं चित्तकालुष्यमात्मा चिन्निर्मला भवेत्।६।१-३१।३५

सर्वगापि चिदुच्छूनबोधात्स्पन्दादिकं प्रति ।
बोधात्कल विमलं चिदेव परमं शिवम् । ६।१-३५।१३

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भारूपश्चेतनो व्यापी परमात्माहमित्ययम् ।
राघवानुभवान्तस्त्वं तिष्ठन्गच्छञ्छ्वसन्स्वपन् । ६।१-४६।२५
निर्ममो निरहंकारो बुद्धिमानसि साधु चेत् ।
तद्ब्रह्म वेदनं शान्तं सर्वभूतस्थितं भव । ६।१-४६।२६
तदनाद्यन्तमाभासं सत्यमेव परं पदम् ।
स्थितोऽसि सर्वगैकात्मशुद्धसंविन्मयात्मकः । ६।१-४६।२७
आवर्तः सलिलस्येव यः स्पन्दस्त्वयमात्मनः ।
प्रोक्तः प्रकृतिशब्देन तेनैवेह स एव हि । ६।१-४६।३०
अबोधादेतयोर्भेदो बोधेनैव विलीयते ।
अबोधात्सन्मयो याति रज्ज्वां सर्पभ्रमो यथा ।६।१-४६।३२
चित्त्वजाड्यात्मकं चित्तं दृढं भावयति स्वयम् ।
यथा यदैव यद्भावं तथा भवति तत्तदा ॥ ६।१-५१।३८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वृत्तयो यदि वोधेन संशान्ता हृदयेस्फुटम् ।
तच्चित्तं शान्तमेवान्तर्विद्धि सत्त्वमुपागतम्॥ ६।१ ५८।२

यत्संवेद्यविनिर्मुक्तं संवेदनमनिर्मितम् ।
चेत्यमुक्तं चिदाभासं तद्विद्धि परमंपदम् ॥ ६। ५९।४

आत्मनात्मनि शान्तैव चिच्चमत्कुरुते चिति ।
चित्प्रस्पन्दो हि संसारस्तदस्पन्दः परमं पदम्॥६।१-५९।२१

चित्तेज एव चित्स्पन्द इति बुद्ध्व निरन्तरम् । ६।१-५९।४६॥
व्यतिरिक्तश्चितःस्पन्दो न किञ्चिदत्रशिष्यते ।६।१-५९।४७॥

स्वरूपेनिर्मले सत्ये निमेषमपि विस्मृते । ६।२-८५।११॥
दृश्यमुल्लासमाप्नोति प्रावृषीव पयोधरः ।
अनारतानुसंधानादप्युन्मेषमविस्मृते ॥ ६।२-८५।१२
स्वरूपेनोल्लसत्येष चित्ते दृश्यपिशाचकः । ६।२-८५।१३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वत्यागो हि शून्यात्मा आश्रयः सर्वसंविदाम् ।६।१-९३।५५।।
सर्वत्यागान्तरेवास्ति ज्ञानमात्मप्रसादकम्। ६।१-९३।६०॥
यदिदं दृश्यते किंचिज्जगत्स्थावरजङ्गमम् ।
सर्वं सर्वप्रकाराढ्यं कल्पान्ते तद्विनश्यति ॥ ६।१-९६।१०
ततः स्तिमितगम्भीरं न तेजो न तमस्ततम् ।
महाकल्पविलासान्ते सत्सारमवशिष्यते ॥ ६।१-९६।११
चिन्मात्रममलं शान्तमाभातं परमं नभः ।
समस्तकलनोन्मुक्तं युक्तं परमया धिया ॥ ६।१-९६
यदेकोदितमत्यच्छं शान्तमाततमुज्ज्वलम् ।
परमात्मात्मकं तेजस्तिमितं ज्ञप्तिमात्रकम् ।। ६।१-९६।१३
अप्रतर्क्यमविज्ञेयं समं शिवमनिन्दितम् ।
ब्रह्मनिर्वाणमापूर्णमापूर्णादितसंविदा ॥ ६।१-९६।१४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अणीयसामणीयश्च स्थविष्ठं च स्थवीयसाम् ।
गरीयसां गरिष्ठं च श्रेष्ठं च श्रेयसामपि ॥ ६।१-९६।१५

आत्मरूपमनाभासं स्वयं वेदनमक्षतम् । ६।१-९६।३०॥

चिन्मात्रमेव कचति यच्चिन्मात्रमयात्मनि । ६।१-९६।४८॥

अकचित्वैव तन्नाम कचितं सर्गवेदनम् । ६।१-९६।४९॥

असंवेदनमज्ञानं ज्ञानं संवेदनं भवेत् । ६।१-१००।१८॥

अज्ञानसत्त्वसंवित्तेर्ज्ञानात्संवेदनात्क्षयः । ६।१-१००।१९॥

सर्गश्चित्स्पन्दमात्रात्मा सम्यग्दृष्टौ विलीयते ।
उदेत्यसम्यग्दृष्टीनां रज्ज्वां सर्पभ्रमो यथा ॥ ६।१-१०५।५८

स्वयमेवात्मनैवात्मा शक्तिं संकल्पनामिकाम् ।
यदा करोति स्फुरता स्पन्दशक्तिमिवानलः ॥६।१-११४।१५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तदा पृथग्गिवाभासं संकल्पकलनामयम् ।
मनो भवति विश्वात्मा भावयन्स्वाकृतिं स्वयम्॥ ६।१-११४।१६

ब्रह्म प्रबृंहिताकारं तस्मादन्यन्न विद्यते । ६।१-११४।२७॥

अदृश्यो दृश्यते राहुर्गृहीतेन यथेन्दुना ।
तथानुभवमात्रात्मा दृश्येनात्मावलोक्यते ॥ ६।१-११८।३

दृश्यते त्वात्मनैवात्मा स्वया सत्त्वस्थया धिया॥ ६।१-११८।४॥

अहो नु चित्रा मायेयं तात विश्वविमोहिनी ।
सर्वाङ्ग प्रोतमप्यात्मा यदात्मानं न पश्यति ॥ ६।१-११६।५

चिदादर्शमयं सर्वं जगदित्येव भावयन् ।
यस्तिष्ठत्युपशान्तेच्छः स ब्रह्मकवचः सुखी ॥ ६।१-११६।६

अन्तः प्रत्याहृतिवशाच्चेत्यं चेन्न विभावितम् ।
मुक्त एवाऽस्यसंदेहो महासमतया तया ॥ ६।१-१२०।१०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वप्रकाशं स्वमात्मानमवलम्ब्याविलम्बितम् ।
आस्स्व संपूरिताकाशं जगन्ति नृप पश्य हे । ६।१-१२१।६

यदैवं चितो रूपं ततं बुद्धमखण्डितम् ।
तदैव तीर्णः संसारः परमेश्वरतां गत । ६।१-१२१।७

मा भव ग्राह्यभावात्मा ग्राहकात्मा च मा भव ।
भावनामखिलां त्यक्त्वा यच्छिष्टं तन्मयो भव । ६।१-१२४।७

शान्तं सम्यक्प्रबुद्धानां यथास्थितमिदं जगत् ।
विलीनं तुर्यमेवाहुरबुद्धानां स्थिरं स्थितम् । ६।१-१२४।२६

अहंकारकलात्यागे समतायाः समुद्भवे ।
विशरारौ कृते चित्ते तुर्यावस्थोपतिष्ठते । ६-१२४।२७

सिद्धान्तोऽध्यात्मशास्त्राणां सर्वापह्नव एव हि ।
नाविद्यास्तीह नो माया शान्तं ब्रह्मेदमक्रमम् । ६।१-१२५।१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वमेव परित्यज्य महामौनी भवानघ ।
निर्वाणज्ञान्निर्मननः क्षीणचित्तः प्रशान्तधीः ।६।१-१२५।४
आमन्येवास्स्व शान्तात्मा मूकान्धवधिरोपमः ।
नित्यमन्तर्मुखो भूत्वा स्वात्मनान्तःप्रपूर्णधीः ।६।१-१२५।५
एतावानेव संसार इदमस्त्विति यन्मनः । ६।१-१२६।८५॥
अस्य तूपशमो मोक्ष इत्येव ज्ञानसंग्रहः । ६।१-१२६।८६॥
असंवेदनमात्रेण नोदेतीच्छा भवाङ्कुरः । ६।१-१२६।८७॥
स्वसंवेदनयत्नस्तु तूष्णीमेवान्तरासनम् । ६। -१२६।८९॥
कूटस्थः केवलो व्यापी चिदचिच्छक्तिमानहम् ।
घटाभावे घटाकाशकलशाकाशयोर्यथा । ६।१-१२८।२८
हेयोपादेयनिर्मुक्तं सत्यरूपं निरिन्द्रियम् । ६।१-१२८।३५॥
केवलं सत्यसंकल्पं शुद्धं ब्रह्मास्म्यस्म्यहंपरम् ।६।१-१२८।३६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एतच्चेतनशब्दार्थभावनावलितंयदि ।
तत्कर्मवीजतामेति नोचेत्सत्परसंपदम् । ६।२-२।२८

चितिश्चेतनशब्दार्थभावनावलिता यदि ।
तत्कर्मवीजतामेति नोचेदाद्यं परंपदम् । ६।२-२।२६

अवेदनमसंवेद्यं यदवासनमासितम् ।
शान्तं सममनुल्लेखं स कर्मत्याग उच्यते ॥ ६।२-३।२४

न त्यागः कर्मसंत्यागो वोधस्त्याग इतिस्मृतः ।
अजगत्प्रतिभैकात्मा योऽनहंतादिरव्ययः ॥ ६।२-४।२

संविन्मात्रं विदुर्जन्तुं तस्य प्रसरणं जगत् ।
आत्मनिष्ठत्वमजगत्परमेत्युपदेशभूः ॥ ६।२-२२।५०

सुषुप्तत्र इव स्वप्नः समाधौ प्रविलीयते ।
दृश्यं सर्वं ज्ञबोधेऽन्तः पुनः स्वात्मैव लक्ष्यते । ६।२-२६।६६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संक्षुब्धमक्षुब्धमिति द्विरूपं
संवित्स्वरूपं प्रवदन्ति सन्तः।
श्रेयः परं येन समीहसे त्वं
तदेकनिष्ठो भव माऽमतिभूः ॥ ६।२-३४।४८

देशाद्देशान्तरं दूरं प्राप्तायाः संविदः क्षणात्।
यद्रूपममलं मध्ये परं तद्रूपमात्मनः। ६।२-३५।१

चितश्चेत्योन्मुखत्वं यत्तच्चित्तं सैव संसृतिः।
सेच्छा तन्मुक्तता मुक्तिर्युक्तिं ज्ञात्वेति शाम्यताम्। ६।२-३७।५१

प्रतिभात्मैव भारूपो भाति सर्गो महाचिति। ६।२-४२।२३॥
प्रतिभामात्रमेवाच्छं नतु ज्ञप्तेर्घटादि सत्। ६।२-४२।३६॥
ज्ञानात्मिकैव प्रतिभा ज्ञप्तिरेवाखिलं जगत्।
ज्ञप्तिरप्यात्मतत्त्वश्रीः परिज्ञातोपशाम्यति। ६।२-४२।४०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उपशान्तेन दान्तेन स्वात्मारामेण मौनिना ।
ज्ञातैवान्विष्यते ज्ञेन विज्ञानैकान्तवादिना ॥ ६।२-४८।८

सबाह्याभ्यन्तरं शान्ता ज्ञतैवार्थतयोदिता ।
न संभवति भिन्नोऽर्थ इत्येव परमं पदम् । ६।२-४८।१०

नार्थोपलब्धिर्नो शून्यमस्ति बोधात्मतां विना ।
इत्यन्तरनुभूतिस्थमाहुस्तत्परमंपदम् ॥ ६।२-४८।११

एकबोधातिसंबन्धपरिणामान्नबोधता ।
न शून्यता नार्थतेति विद्धि तत्परमं पदम् ॥ ६।२-४८।१२

स्वसंविन्मात्रविश्रामवतामभनसां सताम् ।
न स्वदन्ते हि विषयाः पयांसि दृषदामिव ॥ ६।२-४८।१३

ईश्वरो न महाबुद्धे दूरे न च सुदुर्लभः ।
महाबोधमयैकात्मा स्वात्मैव परमेश्वरः ॥ ६।२-४८।२२

यदस्पन्दि मनोरूपं रूपं तस्य पदस्य तत् । ६।२-५३।१२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बोध एव कचत्यर्थरूपेण स च खादणुः ।
दृष्टान्तोऽत्रानुभूतोऽन्तः स्वप्नसंकल्पपर्वतः ॥ ६।२-५४।१८

सर्वशक्त्यात्म तद्ब्रह्म यथा कचति यादृशम् ।
रूपमत्यजदेवाच्छं तथा भवति तादृशम् ॥ ६।२-५७।२१

चिति सर्वं चितः सर्वं चित्सर्वं सर्वतश्च चित् ।
चित्सत्सर्वात्मिकेत्येतद्दृष्टं तत्र मयाखिलम् ॥ ६।२-६०।२३

इति मायेव दुष्पारा चिच्छक्तिः परिजृम्भते ।
इत्थमाद्यन्तरहिता ब्राह्मी शक्तिरनामया ॥ ६।२-७०।१८

यान्तर्वेत्ति यथा संवित्सा तथानुभवत्यलम् ।
अस्तु सत्यमसत्यं वा सिद्धमित्यनुभूतितः ॥ ६।२-७९।३१

विज्ञानघन एवायं कचनाकचनात्मकः ।
स्वयमेव कचत्यन्तर्न कचत्येव च स्वयम् ॥ ६।२-८९।३८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संविदुद्बोधने बन्धस्तदनुद्बोधने शिवम् ।
असत्सद्वज्जगद्भाति संविदुद्बोधनोदरम् ॥ ६।२-७९।४०

अजडं वेदनं सुप्तं मोक्ष इत्यभिधीयते ।
प्रबुद्धं बन्ध इत्याहुर्यदिच्छसि तदाहर ॥ ६।२-७९।४१

अनन्यां तस्य तां विद्धि स्पन्दशक्तिं मनोमयीम्।६।२-८४।२॥
तत्स्पन्दमायाशक्त्यैव लक्ष्यते नान्यथा किल।६।२-८४
स्पन्दशक्तिस्तदिच्छेदं दृश्याभासं तनोति सा।६।२-८४।६॥
स्पन्दमात्रात्मिका सेच्छा चिच्छक्तिः पारमेश्वरी।६।२-८५।१६॥
चितिः शिवेच्छा सा देवं तमेवासाद्य शाम्यति।६।२-८५।

यस्तु ज्ञानप्रबुद्धात्मा देहस्तस्याधिभौतिकः ।
शाम्यत्युदेति विमलो बोधात्मैवातिवाहिकः॥६।२-९१।५३

आतिवाहिकदेहेन तेन बोधात्मनाणुना ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बृहता वा यथाकामं निर्वाणात्मावतिष्ठते ॥ ६।२-६१।५४

चिदाकाशं वर्जयित्वा शवमेव शरीरकम् ।
अच्छेद्योऽसावदाह्योऽसौ चिदाकाशो न शाम्यति ६।२-६६।१२

पुरुषो न शरीरादि न च चित्तादि किञ्चन ।
पुरुषश्चेतनं नाम न स नश्यति कर्हिचित् । ६।२-१०२।५६

देशाद्देशान्तरप्राप्तौ विदो मध्ये हि यद्वपुः ।
शान्ताशेषविशेषात्म तन्मुख्यनेतरद्विदुः ॥ ६।२-१०३।७८

भावाद्भावान्तरप्राप्तौ मध्ये यत्संविदो वपुः ।
तच्चिद्व्योम तदेवेदं सर्वं च स्थिति नेतरत् । ६।२-१०६।५५

तत्तःस्वरूपमुत्सृज्य बुद्ध्वा चिन्मात्रात्मकं जगत् ।
अश्मना चेतनेनैव स्थेयं नान्यधेतरोत्तमा ॥ ६।२-१६।५७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देशाद्देशान्तरप्राप्तौ यन्मध्ये संविदो वपुः ।
अनुन्मेषं चिदाकाशं तद्विद्यात्तन्मयंजगत् ।।६।२-१२५।७१

यद्यथा यात्र्याभाति चिति चित्त्वात्स्वभावतः ।
तत्तथा तावदाभाति तत्रतत्र तदात्मकम् ।। ६।२-१२७।५

न प्रकाशं न च तमो महाचिद्घनमव्ययम् । ६।२-१२८।१२।।

देशाद्देशान्तरप्राप्तौ यन्मध्ये संविदो वपुः ।
चिन्मात्रस्यास्य तद्रूपमनन्तस्यैकरूपिणः ।। ६।२-१२८।२७

कारणाज्जगदुत्पन्नं न ब्रह्मोथमवस्थितम् ।
जगत्तया शान्तमजं बोध इत्येव तुर्यता ।। ६।२-१३७।६०

असंभवात्संभवकारणानां
न जायते किंचन नामसर्गः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चिच्चेतनेनैवहि सर्गसंवित्

स्वयं गृहीता द्रवताम्बुनेव ॥६।२-१३७।६१

समस्तमननत्यागे योऽसि सोऽसि निरामयः।

वहिरन्तरनन्तात्मा सुस्थितोऽपि निरन्तरम् ॥ ६।२-१४२।२२

ज्ञानं यदेव तज्ज्ञेयं ज्ञेयस्यासंभवात्पृथक्।

यथा ज्ञानमतोज्ञेयं तनोत्यात्मानमात्मना ॥६।२-१४३।५५

प्रतिभैव चिदात्मिका ६।२-१५६।४६॥

तत्सत्तासंनिवेशात्म कारणानन्यखात्म च।

चिद्भानमात्रमव्यग्रं खमेवाप्रतिघं जगत्। ६।-२।१५६।५५

यैव चिद्भा जगत्सैव नैकतात्र न च द्विता। ६।२-१५६।५८॥

भवत्याकाश एवैषा दृश्यश्रीर्गगनात्मिका।

अनन्यदृष्टा चिद्रूपा स्वप्नवत्स्वात्मद्रष्टृका। ६।२-१५६।६५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एषा हि संपरिज्ञाता तिष्ठत्यपि यथास्थितम् ।
भामात्ररूपनिर्वाणा निशान्ताऽप्रतिभाकृतिः ॥६।२-१५६।६६
शान्ताशेषविशेषात्म यथास्थितमवस्थितम् ।
सदसद्वा जगज्जालं परिज्ञानेन शाम्यति ॥ ६।२-१५६।६७
सदंशो वोध तद्ग्राह्यमय एव यथा तथा ।
दृष्टा य एव दृश्यं तदद्वैतवेदनमेककम् ॥ ६।२-१६१।४३
शाम्यत्यशान्तमेवेदं स्थितमेव विलीयते ।
दृश्यं तत्त्वपरिज्ञानाद् दृश्यमानं न दृश्यते॥६।२-१६२।२६
तथानुभूयमानापि सर्गसंवेदनाम्वरे ।
चिन्मये तत्त्वविज्ञानाच्छून्यतैवावशिष्यते ॥ ६।२-१६२।२८
चिन्मात्रं पुरुषं विद्धि चेतनाज्जीवनामकम् ।
यच्चेचति स जीवोऽन्तस्तन्मयो भवति क्षणात् ॥६।२-१६३।४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संविदं संविदाकाशे संरोप्य हृदि तिष्ठतः।
स्वयमेव मनः शाम्येन्नीहार इव शारदः॥ ६।२-१६३।७

अन्तः संवेदनं भाति स्वं वाह्यार्थतया यतः।
क्व द्वैतं क्व च वार्थश्रीः स्मृतिरेवमतः कुतः॥ ६।२-१६७।२८

ज्ञानं स्वभावकचनमज्ञानं भ्रान्तिजृम्भणम्। ६।२-१६८।३३॥

ज्ञानेनाकाशकल्पेन धर्मान्गगनसन्निभान।
ज्ञेन यत्नेन संबुद्धः परमाम्वरतां गतः॥ ६।२-१६९।४३

चिन्मात्रेणापि रहितं शून्यत्वेनापि वर्जितम्।
पदं सर्वात्मरिक्तं तत्सर्वार्थैश्च समन्वितम्॥ ६।२-१७१।३५

आश्वस्तान्तःकरणः
क्षीणविकल्पः स्वरूपसारमयः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परमशमामृत तृप्त

स्तिष्ठति विद्वान्निरावरणः ॥ ६।२-१७१।५६

अनुभवितैवानुभवं

सत्यं स्वात्मानमप्यसन्तमिव ।

अनुभवतीयत्त्वेन

स्वप्ननटः स्वप्नदेशमिव ॥ ६।२-१७३।३३

अत्यन्तासंभवं दृश्यं यद्वै निर्भाणमासितम् ।

शुद्धबोधोदयं शान्तं तद्विद्धि परमं पदम् ॥ ६।२-१७४।२१

निद्राव्यपगमे स्वप्ननगरे यादृशं स्मृतौ ।

चिद्व्योमात्मपरं विद्धि तादृशं त्रिजगद्भ्रमम् ॥ ६।२-१८४।४४

किलेदं भ्रान्तिमात्रात्म विश्वं ब्रह्मेति भात्यजम् ।

भ्रान्तिर्ब्रह्मैव च ब्रह्म शान्तमेकमनामयम् ६।२-१८६।३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

याद्दग्प्रबोधे स्वप्नादिस्ताद्दग्देहो निराकृतिः
संविन्मात्रात्मा प्रतिघः स्वानुभूतोऽप्यसन्मयः॥ ६।२-१८६।१३

चिच्चिनोति तथा जाड्यं नरो निद्रास्थितिर्यथा ।
चिनोति जडतां चित्त्वं न नाम जडतावशात् ॥ ६।२-१८६।१७

सम्यग्ज्ञानवतो ज्ञस्य यथाभूतार्थदर्शिनः ।
बुद्धिर्भवति चिन्मात्ररूपा द्वैतैक्यवर्जिता ॥ ६।२-१८

चितिशक्तेः परायास्तु स्वसंवेदनमात्रकम् ।
जगज्जालमसद्रूपं चेतनात्सदिवस्थितम् ॥ ६।२-१८७।४४

ज्ञानस्य ज्ञेयता नास्ति केवलं ज्ञानमव्ययम् ।
अवाच्यमिति बोधोन्तः सम्यग्ज्ञानमिति स्मृतम्॥ ६।२-१९०।५

बोधमात्रं भवेज्ज्ञानं भावसाधन्तमात्रकम् ।
नज्ञानज्ञेययोर्भेदः पवनस्पन्दयोरिव ॥ ६।२-१९०।७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

करणाज्जायते कार्यं नान्यथेत्येव निश्चयः ।
सर्वोपशान्तौ जगतामुत्पत्तौ नास्ति कारणम् ॥ ६।२-१९०।१५

भित्तौ प्रकाशो भातीव तत्कुड्यं भासनं च तत् ।
दृश्यस्यासंभवादादौ वक्ता द्रष्टा प्रदृश्यताम् ॥ ६।२-१९१।६

चिद्भात्येव हि सर्गादौ कचन्ती भाति सर्गवत् ।
भासनीयं च भानं च रूपं यत्र स्वयंप्रभा ॥ ६।२-१९१।९

चिन्मात्रव्योमसर्गादावित्थं कचकचायते । ६।२-१९१।१८॥

सर्वं शान्तं निरालम्बं विज्ञानं केवलं स्थितम् ।
अनन्तं चिद्घनं व्योम निरागमपकल्पनम् ॥ ६।२-१९२।३

भ्रान्तिर्न संभवत्येव निर्विकारे ज्ञतापदे ।
यत्त्विदं भ्रान्तिताज्ञानं तत्तदेवेतरन्न तत् ॥ ६।२-१९२।१०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अप्रामाणिकविचारेण प्रेक्षितं यन्न लभ्यते ।
तदेतदसदेवादि तत्तद्ध्यनुभवो भ्रमः ॥ ६।२-१६७।१६

वैतृष्ण्यात्सर्वभावानां समाप्त्यैवाक्षयं स्वयम् ।
संपद्यते समाधानं यत्तन्निर्वाणमुच्यते ॥ ६।२-१६४।२०

अभिन्नवोधसद्रूपस्वरूपानुभवे स्थितः ।
व्युत्थितः सन्निरुद्धश्च यः पश्यति स शाम्यति ॥ ६।२-१६४।१७

शिष्यते स्फीतवोधानां केवलानन्तवोधता ।
सापि स्वपरिणामेन परेणायात्यवाच्यताम् ॥ ६।२-१६४।१८

तद्विश्रान्तौ परासत्ता शिष्यते वा न विष्यते ।
या काप्यत्यन्तशान्तानां न वाग्गोचरमेतिसा ॥ ६।२-१६४।२०

या समस्य पराकाष्ठा सैव वोधस्य सन्मयी ।
सर्गस्तन्मय एवातः सकलं शान्तमव्ययम् ॥ ६।२-१६४।२१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राप्तज्योतिर्बोधशुद्धिः परमन्तः प्रकाशवान् ।
नीहारः शरदीवाशु स्वयमेवोपशाम्यति ॥ ६।२-१९४।४०

बृंहति ब्रह्मणि ब्रह्म व्योम व्योमनि वर्धते ।
न चोपपद्यते किंचिद्ब्रह्म व्योम्नि विबृंहणम्॥ ६।२-१९५।४९

या संविदन्तः स्फुरति सैवोपयाति वाक्यताम्॥ ६।२-१९५।५४॥

जगद्बुद्धाविदं सत्यं परिज्ञानवतो मृषा ।
ब्रह्मात्मक इदं ब्रह्म शान्ते शांन्त पराम्बरम् ॥ ६।२-१९५।६०

चिद्रूपत्वादुदेतीदं जगत्तत्रैव लीयते ।
अकारणकमेवान्तः परंव्योमैव निर्मलम् ॥ ६।२-१९५।६४

सर्वागमार्थसमतीतमचिह्नमच्छ ।
माकाशमेकमजमाद्यमनामरूपम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शुद्धं चिदात्मकमिहास्त्यनुभूतिमात्रं ।
शान्ताभिधानकलनं मलशङ्कयालम् ।। ६।२-१६५।७०

तच्छ्रुतं यत्किल ज्ञप्त्यै सा ज्ञप्तिः समता यया ।
तत्साम्यं यत्र सौषुप्तीस्थितिर्जाग्रिति जायते।। ६।२-१६७।३२

अर्थो वेदनसंकेतः शब्दो जलरवोपमः ।
दृश्यमेतच्चिदाभानं स्वप्नवत्काभवज्जगत् ।। ६।२-२०४।२

जाग्रद्वै स्वप्नसंदृष्टः स्मरणात्म स्थितं पुरः ।
संविद्वेदनमात्रं सत्तदन्याकारवत्ततम् ।। ६।२-२०४।३

यथाच्छं संविदाकाशं मयि स्वप्नपुरात्मकम् ।
सरूपमपि नीरूपं तथेदं भुवनत्रयम् ।। ६।२-२०४।४

चितौ यत्कचनं नाम स्वरूपप्रविजृम्भणम् ।
तदेतज्जगदित्युक्तं द्रवएव यथा जलम् । ६।२-२०४।२:

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदं जगद्भानमभानमेव
चिद्व्योमशून्यं परमार्थ एव ।
यथार्थसंदर्शनबुद्धबुद्धे
रबुद्धबुद्धेस्तु यथा तथास्तु ॥ ६।२-२०४।२९

सर्वं शान्तं निरालम्बं ज्ञप्तिमात्रमनामयम् ।
नेह सत्ता न वा सत्ता न च नानास्ति किञ्चन॥ ६।२-२०५।३५

संकल्पस्वप्ननगरनृत्तवत्सर्वमाततम् ।
स्थितमेव समं शान्तमाकाशमजमव्ययम् ॥ ६।२-२०५।३६

समस्तकारणाभावात्सर्गादावन्यतात्र का । ६।२-२०७।६॥

एवं यदेव विमलं वेदनं ब्रह्मसंज्ञितम् ।
तदेवेदं जगद्भाति तत्केव जगतोऽन्यता ॥ ६।२-२०७।७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न शून्यरूपं न च सत्स्वरूपं
ब्रह्माभिधं भाति जगत्स्वरूपम् ।
तच्चापरिज्ञानवशादनर्थ
भूतं परिज्ञातवतः शिवात्म ॥ ६।२-२७।३८

ब्रह्मसंकल्पनगरं जगत्तावदिदं स्थितम् ।
यद्दृश्यं दृश्यबोधेन ब्रह्मैव ब्रह्मबोधतः ॥ ६।२-२०८।२

चिद्रूपब्रह्मसंकल्पवशादेवैतदङ्ग सत् ।
चिदुन्मेषनिमेषौ यौ तावेतौ प्रलयोदयौ ॥ ६।२-२०८।६

यथास्थितमिदं दृश्यं परिज्ञानाद्विलीयते ।
तज्ज्ञस्यास्तंगतस्यैव शिलामौनं तु शिष्यते । ६।२-२१०।३८

सकलार्थनिरासेन यद्यत्संवेद्यते चिरम् ।
तदेव प्राप्यतेऽवश्यं सर्वत्रैवान्यभावितम् ॥ ६।२-२१०।४०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ब्रह्मैव तदिदं सर्वं निर्नाम्नैवामलं नभः ।
किमप्येवाजमाशान्तमादिमध्यान्तवर्जितम् ॥६।२-२११।३
चिद्भानमात्रमित्युक्तं ब्रह्मेति कलिताभिधम् ।
परात्परमिति प्रोक्तं तत्त निर्नामकं पदम् ॥ ६।२-२११।४
एवमेतत्सदैवैतदहमाद्यपि चेतति ।
न ह्यनादेरजस्यास्य काप्यपेक्षा स्वसंविदा । ६।२-२१२।
ब्रह्मैव शान्तमजमेकमनादिमध्यं
व्योमैव जीवकलनामिव भावयित्वा ।
व्योम्न्येव पश्यति निरावरणे विसारि
दृश्यं स्वरूपमपि चान्यदिवात्मवित्त्वात् ॥ ६।२-२१२।२६
अस्यैतद्वस्तुनो रूपं चिद्व्योम्नो वितता कृतेः ।
रूपमत्यजदेवाच्छं यदित्थमवभाषते ॥ ६।२-२१३।१६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शुद्धं द्रष्टेव चिद्व्योम दृश्यतामिव भावयत् ।
स्वमात्मानं जगदिति पश्येत्तिष्ठेदनामयम् ॥ ६।२-२१३।४६

स्मृतिर्वाग्दृष्टिसत्ता च स्वप्ने वन्ध्यासुतेऽजले ।
मरीचिका यथा तद्वज्ज्ञानात्सांसारिकी स्थितिः ॥ ६।२-२१६।१३

साक्षिणि स्फुरिताभासे ध्रुवे दीप इव क्रियाः । ६।२-२१६।१८॥

सति यस्मिन्प्रवर्तन्ते चित्तेहाः स्पन्दपूर्विकाः ।
कटकाङ्गदकेयूरनूपुरैरिव काञ्चनम् ॥ ६।२-२१६।१९

पयसीव तरङ्गाली यस्मात्स्फुरति दृश्यभूः ।
तदेवेदं जगत्सर्वं पूर्णं पूर्णं व्यवस्थितम् ॥ ६।२-२१६।२०

यत्सर्वं खल्विदं ब्रह्म तज्जलानिति च स्फुटम् ।
श्रुत्या ह्युदीर्यते साम्नि तस्मै ब्रह्मात्मने नमः ॥ ६।२-२१२६५।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्तिं
द्वन्द्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम् ।
एकं नित्यं विमलमचलं सर्वधीसाक्षिभूतं
भावातीतं त्रिगुणरहितं श्रीवसिष्ठं नतास्मः ।। ६।२-२१६।२६

ब्रह्मसूत्रम्

जन्माद्यस्य यतः । १।१।२

शास्त्रयोनित्वात् । १।१।३

तत्तु समन्वयात् । १।१।४

ज्ञोऽत एव । २।३।१८

चिति तन्मात्रेण तदात्मकत्वात् ४।४।६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सिद्धान्तदर्शनम्

चिद्वैवास्ता । १।१।१२

सत्ताऽजायाश्छायावत् । १।२।१

तत्ताधिगमोऽनुबिम्बेक्षणात् । १।२।१४

शक्तिर्व्यासत्तिः । १।२।३५

निर्मनस्के साराभिव्यक्तिः । १।३।२६

सच्चिदानन्दःपुरुषः । २।१।१

द्वैतविस्मृतेरभिव्यक्तिः । २।२।११

तद्दीक्षावैसर्वार्था । २।४।१६

द्विधैकोऽपिक्लृप्तेः । ३।२।१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्समापत्तिरैकाग्र्यान्मणिवच्चित्तस्य । ३।३।२२

चैतन्यं हि धीस्थं वृत्त्या स्फुरज्ज्ञानं गवाक्षार्कवत् ४।१।१

त्रिपुटग्रभानाद्भूमानन्दाभिव्यक्तिः ४।२।७

प्राणकलाः परस्मिन्नस्तमियुराम्नायात् ४।४।१४

कौलोपनिषत्

विषयाः ज्ञानस्वरूपाः ।

ज्ञानं बुद्धिश्च ।

ज्ञानं मोक्षैककारणम् ।

मोक्षस्सर्वात्मतासिद्धिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रिपुरामहोपनिषत्

परिस्रुता हविषा पावितेन
प्रसंकोचे गलिते वै मनस्तः।
शर्वः सर्वस्य जगतो विधाता
धर्ता हर्ता विश्वरूपत्वमेति ॥ १५

भावनोपनिषत्

निरुपाधिकसंविदेव कामेश्वरः। २७

सदानन्दपूर्णः स्वात्मैव परदेवता ललिता। २८

अनन्यचित्तत्वेन च सिद्धिः ३०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बह्वृचोपनिषत्

सैषा परा शक्तिः ३

सा वै प्रत्यक् चितिः । ४

सैव आत्मा ।

चिद्विद्याऽद्वितीयाब्रह्मसंवितिः

सच्चिदानन्दलहरी महात्रिपुरसुन्दरी

बहिरन्तरनुप्रविश्य स्वयमेकैव विभाति ।

यदस्ति सन्मात्रम् । यद्विभाति चिन्मात्रम् ।

यत्प्रियमानन्दम् । तदेतत्सर्वाकारा ।

सत्यमेकं ललिताख्यं वस्तु

तदद्वितीयमखण्डार्थं परंब्रह्म । ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अधिष्ठानं परंतत्त्वमेकं सच्छिष्यते महत् । ६
प्रज्ञानं ब्रह्मेति वा अहं ब्रह्मास्मीति वा भाष्यते ।
तत्त्वमसीत्येवं संभाष्यते ।
अयमात्मा ब्रह्मेति वा
अहं ब्रह्मास्मीति
ब्रह्मैवाहमस्मीति वा । ७

अक्ष्युपनिषत्

विभ्राजमानां हरिणीं यशसा संपरिवृताम् ।
पुरं हिरण्मयं ब्रह्मा विवेशापराजिता ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कालिकोपनिषत्

ॐ ब्रह्मरन्ध्रे ब्रह्मरूपिणी ।

ॐ सत्वं(सत्यं) तत्सर्वम् (तत्सत्)

तारोपनिषत्

ब्रह्मरन्ध्रेतारिणी । तारयतीति तारा ।

अद्वैतभावोपनिषत्

अहम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ईशावास्योपनिषत्

स पर्यगाच्छुक्रमकायमव्रण
मस्नाविरं शुद्धमपापविद्धम् ।
कविर्मनीषी परिभूः स्वयम्भूर्याथा
तथ्यतोऽर्थान्व्यदधाच्छाश्वतीभ्यःसमाभ्यः ।८
संभूतिं च विनाशं च यस्तद्वेदोभयं सह ।
विनाशेन मृत्युं तीर्त्वा सम्भूत्याऽमृतमश्नुते । १४

केनोपनिषत्

प्रतिबोधविदितं मतममृतत्वं हि विन्दते ।
आत्मनाविन्दते वीर्यं विद्यया विन्दतेऽमृतम् ॥ २।४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यदेतद्गच्छतीव च मनोऽनेन
चैतदुपस्मरत्यभीक्ष्णं सङ्कल्पः । ४।५

कठोपनिषत्

यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि ।
ज्ञानमात्मनि महति नियच्छेत्तद्यच्छेच्छान्त आत्मनि॥ १।३।१३
अक्षराद्विविधाः भावाः प्रजायन्ते तत्र चैवापियन्ति। २।१।१
दिव्यो ह्यमूर्तः पुरुषः स वाह्याभ्यन्तरो ह्यजः ।
अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात्परतः परः ॥ मु. २।१।२
एको वशी सर्वभूतान्तरात्मा
एकं रूपं बहुधा यः करोति !

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तमात्मस्थं येऽनुपश्यन्ति धीरा

स्तेषां सुखं शाश्वतं नेतरेषाम् ॥ २।२।१२

न सन्दृशे तिष्ठति रूपमस्य

न चक्षुषा पश्यति कश्चनैनम् ।

हृदा मनीषा मनसाऽभिक्लृप्तो

य एतद्विदुरमृतास्ते भवन्ति ॥ २।३।९

यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह ।

बुद्धिश्च न विचेष्टते तामाहुः परमाङ्गतिम् ॥ २।३।१०

तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणाम् ।२।३।११॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रश्नोपनिषत्

एष हि द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता
मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः ।
स परेऽक्षरे आत्मनि सम्प्रतिष्ठते ॥ ४।९

मुण्डकोपनिषत्

तपसा चीयते ब्रह्म ततोऽन्नमभिजायते ।
अन्नात्प्राणो मनः सत्यं लोकाः कर्मसु चामृतम् ॥ १।१।८
यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः ।
तस्मादेतद्ब्रह्म नामरूपमन्नं च जायते ॥ १।१।९
अक्षराद्विविधाः भावाः प्रजायन्ते
तत्र चैवापियन्ति ॥ २।१।१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दिव्यो ह्यमूर्तः पुरुषः सबाह्याभ्यन्तरो ह्यजः ।
अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात्परतः परः ॥ २।१।२

हिरण्मये परे कोशे विरजं ब्रह्म निष्कलम् ।
तच्छुभ्रं ज्योतिषां ज्योतिस्तद्यदात्मविदो विदुः ॥ २।२।९

बृहच्च तद्दिव्यमचिन्त्यरूपं
सूक्ष्माच्च तत्सूक्ष्मतरं विभाति ।
दूरात्सुदूरे तदिहान्तिके च
पश्यत्स्विहैव निहितं गुहायाम् ॥ ३।१।७

न चक्षुषा गृह्यते नापि वाचा
नान्यैर्देवैस्तपसा कर्मणा वा ।
ज्ञानप्रसादेन विशुद्धसत्त्व
स्ततस्तु तं पश्यते निष्कलं ध्यायमानः ३।१।८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एषोऽणुरात्मा चेतसा वेदितव्यो
यस्मिन्प्राणाः पञ्चधा संविवेश ।
प्राणैश्चित्तं सर्वमोतं प्रजानां
यस्मिन्विशुद्धे विभवत्येष आत्मा ॥ ३।१।९

नायमात्मा प्रवचनेन लभ्यो
न मेधया न वहुधा श्रुतेन ।
यमेवैष वृणुते तेन लभ्य
स्तस्यैष आत्मा विवृणुते तनुं स्वाम् ॥ ३।२।३

विद्वान्नामरूपाद्विमुक्त.
परात्परं पुरुषमुपैति दिव्यम् ॥ ३।२।८

स यो ह वै तत्परमं ब्रह्मवेद ब्रह्मैव भवति । ३।२।९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

माण्डूक्योपनिषत्

सर्वं ह्येतद्ब्रह्मायमात्मा ब्रह्म । २

एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष

योनिः सर्वस्य प्रभवाप्ययौ हि भूतानाम् । ६

नान्तः प्रज्ञं न वहिष्प्रज्ञं नोभयतः प्रज्ञं

न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञम् ।

अदृश्यमव्यवहार्यमग्राह्यमलक्षणम

चिन्त्यमव्यपदेश्यमेकात्मप्रत्ययसारं

प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं

मन्यन्ते स आत्मा स विज्ञेयः । ७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अमात्रश्चतुर्थोऽव्यवहार्यः प्रपञ्चोपशमः
शिवोऽद्वैत एवमोंकार आत्मैव संविशत्यात्मनात्मानं
य एवं वेद । १२

आदावन्ते च यन्नास्ति वर्तमानेऽपि तत्तथा ।
वितथैः सदृशाः सन्तोऽवितथा इव लक्षिताः ॥ गौ.२।६

कल्पयत्यात्मनाऽऽत्मानमात्मा देवः स्वमायया ।
स एव बुध्यते भेदानिति वेदान्तनिश्चयः ॥ २।१२

जीवं कल्पयते पूर्वं ततो भावान्पृथग्विधान् ।
बाह्यानाध्यात्मिकांश्चैव यथा विद्यस्तथा स्मृतिः ॥ २।१६

नाऽऽत्मभावेन नानेदं न स्वेनापि कथंचन ।
नपृथङ् नापृथक्किंचिदिति तत्त्वविदो विदुः ॥ २।३४

निर्विकल्पो ह्ययं दृष्टः प्रपञ्चोपशमोऽद्वयः । २।३५।६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्त्वमाध्यात्मिकं दृष्ट्वा तत्त्वं दृष्ट्वा तु बाह्यतः ।
तत्त्वीभूतस्तदारामस्तत्त्वादप्रच्युतो भवेत् ॥ ३।३८

अद्वयं च द्वयाभासं मनः स्वप्ने न संशयः ।
अद्वयं च द्वयाभासं तथा जाग्रन्न संशयः ॥ ३।३०

मनोदृश्यमिदं द्वैतं यत्किंचित्सचराचरम् ।
मनसो ह्यमनीभावे द्वैतं नैवोपलभ्यते ॥ ३।३१

आत्मसत्यानुबोधेन न संकल्पयते यदा ।
अमनस्तां तदायाति ग्राह्याभावे तदग्रहः ॥ ३।३२

अकल्पकमजं ज्ञानं ज्ञेयाभिन्नं प्रचक्षते ।
ब्रह्मज्ञेयमजं नित्यमजेनाजं विबुध्यते ॥ ३।३३

लीयते हि सुषुप्ते तन्निगृहीतं न लीयते ।
तदेव निर्भयं ब्रह्म ज्ञानालोकं समन्ततः ॥ ३।३५

अजमनिद्रमस्वप्नमनामकमरूपकम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सकृद्विभातं सर्वज्ञं नोपचारः कथंचन ॥ ३।३६
सर्वाभिलापविगतः सर्वचिन्तासमुत्थितः ।
सुप्रशान्तः सकृज्ज्योतिः समाधिरचलोऽभयः ॥ ३।३७
ग्रहो न यत्र नोत्सर्गश्चिन्ता यत्र न विद्यते ।
आत्मसंस्थं तदा ज्ञानमजाति समतां गतम् ॥ ३।३८
लये सम्बोधयेच्चित्तं विक्षिप्तं शमयेत्पुनः ।
सकषायं विजानीयात्समप्राप्तं न चालयेत् ॥ ३।४४
नाऽऽस्वादयेत्सुखं तत्र निःसङ्गः प्रज्ञया भवेत् ।
निश्चलं निश्चरच्चित्तमेकी कुर्यात्प्रयत्नतः ॥ ३।४५
यदा न लीयते चित्तं न च विक्षिप्यते पुनः ।
अनिङ्गनमनाभासं निष्पन्नं ब्रह्म तत्तदा । ३।४६
स्वस्थं शान्तं सनिर्वाणमकथ्यं सुखमुत्तमम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अजमजेन ज्ञेयेन सर्वज्ञं परिचक्षते ॥ ३।४८

न कश्चिज्जायते जीवः सम्भवोऽस्य न विद्यते।

एतत्तदुत्तमं सत्यं यत्र किंचिन्न जायते ॥ ३।४८

विज्ञाने स्पन्दमाने वै नाऽऽभासा अन्यतोभुवः।

न ततोऽन्यत्र निःस्पन्दान्न विज्ञानं विशन्ति ते ॥ ४।५१

न निर्गतास्ते विज्ञानाद्द्रव्यत्वाभावयोगतः।

कार्यकारणताभावाद्यतोऽचिन्त्या सदैव ते ॥ ४।५२

संवृत्या जायते सर्वं शाश्वतं नास्ति तेन वै।

सद्भावेन ह्यजं सर्वमुच्छेदस्तेन नास्ति वै ॥ ४।५७

चित्तस्पन्दितमेवेदं ग्राह्यग्राहकवद्द्वयम्।

चित्तं निर्विषयं नित्यमसङ्गं तेन कीर्तितम् ॥ ४।७२

योऽस्ति कल्पितसंवृत्या परमार्थेन नास्त्यसौ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परतन्त्राभिसंवृत्या स्यान्नास्ति परमार्थतः ॥ ४।७३
बुद्ध्वाऽनिमित्ततां सत्यां हेतुं पृथगनाप्नुवन् ।
वीतशोकं तथा काममभयं पदमश्नुते ॥ ४।७८
निवृत्तस्याप्रवृत्तस्य निश्चलाहि तदा स्थितिः ।
विषयः स हि बुद्धानां तत्साम्यमजमव्ययम् ॥ ४।८०
अजमनिद्रमस्वप्नं प्रभातं भवति स्वयम् ।
सकृद्विभातो ह्येवैष धर्मो धातुस्वभावतः ॥ ४।८१
यतो न क्रमते ज्ञानमसङ्गं तेन कीर्तितम् । गौ. ४।९६॥

तैत्तिरीयोपनिषत्

ॐ ब्रह्मविदाप्नोति परम् । २।१
सत्यं ज्ञानमनन्तं ब्रह्म ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तदात्मानं स्वयमकुरुत ।

यतो वा इमानि भूतानि जायन्ते ।

येन जातानि जीवन्ति ।

यत्प्रयन्त्यभिसंविशंति ।

तद्विजिज्ञास स्व ।

तद् ब्रह्म।

ऐतरेयोपनिषत्

ॐ आत्मा वा इदमेक एवाग्र आसीत् ।

नान्यत्किंचन मिषत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स ईक्षत लोकान्नुसृजा इति।
स इमाँल्लोकानसृजत। १।१
सर्वं तत्प्रज्ञानेत्रं प्रज्ञाने प्रतिष्ठितं
प्रज्ञानेत्रो लोकः प्रज्ञाप्रतिष्ठा प्रज्ञानं ब्रह्म। ३।१

छान्दोग्योपनिषत्

सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत।
अथ खलु क्रतुमयः पुरुषो यथा क्रतुरस्मिँल्लोके
पुरुषो भवति तथेतः प्रेत्य भवति ३।१४।१
स क्रतुं कुर्वीत।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सदेवेदमग्र आसीदेकमेवाद्वितीयम् । ६।२।१

तदैक्षत वहुस्यां प्रजायेयेति तत्तेजो असृजत । ६।२।३

स य एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यम्

स आत्मा तत्त्वमसि ॥ ६।८।७

आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवास्मृतिः ।

स्मृतिलम्भे सर्वग्रन्थीनां विमोक्षः ॥ ७।२६।२

आकाशो वै नामरूपयोर्निर्वहिता ते

यदन्तरा तद्ब्रह्म तदमृतं स आत्मा ॥ ८।१४।१

बृहदारण्यकोपनिषत्

१।४।१

आत्मैवेदमग्र आसीत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ब्रह्म वा इदमग्र आसीत्तदात्मानमेवावेत् ।
अहम्ब्रह्मास्मीति ।
तस्मात्तत्सर्वमभवत् ॥ १।४।१०
आत्मैवेदमग्र आसीदेक एव । १।४।१७
इदं सर्वं यदयमात्मा । २।४।६
इदं महद्भूतमनन्तमपारं विज्ञानघन एव । २।४।१२
इन्द्रो मायाभिः पुरुरूप ईयते ।
तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यम
यमात्मा ब्रह्म सर्वानुभूरित्यनुशासनम् ॥ २।५।१९
एका देवता मद एवेत्यनन्तम् । ३।१।९
विज्ञानमानन्दं ब्रह्म रातिर्दातुः परायणं
तिष्ठमानस्य तद्विदः । ३।९।२८-७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आत्मनैवायं ज्योतिषाऽऽस्ते पल्यते कर्म
कुरुते विपल्येति । ४।३।६

कतम आत्मेति योऽयं विज्ञानमयः प्राणेषु
हृद्यन्तर्ज्योतिः पुरुषः स समानः सन्नुभौ
लौकावनुसञ्चरति ध्यायतीव लेलायतीव । ४।३।७

स यत्तत्र किंचित्पश्यत्यनन्वागतस्तेन
भवत्यसङ्गो ह्ययं पुरुषः । ४।३।१५

अयं पुरुषः प्राज्ञेनात्मना सम्परिष्वक्तो न
वाह्यं किंचन वेदनाऽऽन्तरं तद्वा अस्यै
तदाप्तकाममात्मकाममकामं रूपं शोकान्तरम् ॥ ४।३।२१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कामभय एवायं पुरुष इति स यथा कामो
भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म
कुरुते यत्कर्म कुरुते तदभिसम्पद्यते ॥ ४।४।५

अकामयमानो योऽकामो निष्काम आप्तकाम
आत्मकामो न तस्य प्राणा उत्क्रामन्ति
ब्रह्मैव सन्ब्रह्माप्येति ॥ ४।४।६

यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः ।
अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत ॥ ४।४।७

मनसैवानुद्रष्टव्यं नेह नानाऽस्ति किञ्चन ।
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति ॥ ४।४।१९

एकधैवानुद्रष्टव्यमेतदप्रमयं ध्रुवम् ।
विरजः पर आकाशादज आत्मा महान्ध्रुवः ॥ ४।४।२०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शान्तो दान्त उपरतस्तितिक्षुःसमाहितो
भूत्वाऽऽत्मन्येवाऽऽत्मानम्पश्यति
सर्वमात्मानं पश्यति । ४।४।२३

स वा एष महानज आत्माऽजरोऽमरोऽ
मृतोऽभयो ब्रह्माभयं हि वै ब्रह्म भवति
य एवं वेद । ४।४।२५

अयमात्माऽनन्तरोऽवाह्यः कृत्स्नः
प्रज्ञानघन एव । ४।५।१३

अविनाशी वा अरेऽयमात्माऽनुच्छित्तिधर्मा । ४।५।१४

यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति
जिघ्रति रसयते अभिवदति शृणोति
मनुते स्पृशति विजानाति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्
जिघ्रेत् रसयेत् अभिवदेत् शृणुयात् मन्वीत
स्पृशेत् विजातीयाद् येनेदं सर्वं विजानाति
तं केन विजानीयात्स एष नेति नेत्यात्माऽ
गृह्यो न हि गृह्यतेऽशीर्यो न हि शीर्यतेऽ
सङ्गो न हि सज्यतेऽसितो न व्यथते न
रिष्यति विज्ञतारमरे केन विजानीयात् । ४।५।१५

श्रुतिसिद्धान्तसारसंग्रहः

ॐ आत्मा वा इदमेक एवाग्र आसीत् ।
नान्यत्किंचन मिषत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स ईक्षत लोकान्नु सृजा इति।

स इमाँल्लोकानसृजत। ऐ.१।१

आत्मैवेदमग्र आसीत्। बृ. आ. १।४।१

ब्रह्म वा इदमग्र आसीत्तदात्मानमेवावेत्।

अहम्ब्रह्मास्मीति।

तस्मात्तत्सर्वमभवत्। बृ आ.१।४।१०

आत्मैवेदमग्र आसीदेक एव। बृ. आ १।४।१७

इदं महद्भूतमनन्तमपारं विज्ञानघन एव। बृ. आ. २।४।१२

इन्द्रो मायाभिः पुरुरूप ईयते।

तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यम

यमात्मा ब्रह्म सर्वानुभूरित्यनुशासनम् बृ. आ. २।५।१९

आत्मनैवायं ज्योतिषास्ते पल्यते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कर्म कुरुते विपर्य्येति। बृ. आ. ४।३।६

सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त
उपासीत। छा. ३।१४।१

तदैक्षत बहुस्यां प्रजायेयेति तत्तेजो
असृजत। छा. ६।२।३

तपसा चीयते ब्रह्म ततोऽन्नमभिजायते।

अन्नात्प्राणो मनः सत्यं लोकाः कर्मसु चामृतम्। मु. १।१।८

यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः।

तस्मादेतद्ब्रह्म नामरूपमन्नं च जायते॥ मु. १।१।९

अक्षराद्विविधाः भावाः प्रजायन्ते
तत्र चैवापियन्ति। मु. २।१।१।

दिव्योह्यमूर्तः पुरुषः सबाह्याभ्यन्तरो ह्यजः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात्परतः परः ॥ मुं.२।१।२

एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष
योनिः सर्वस्य प्रभवाप्ययौ हि भूतानाम् ॥ मां ६

आकाशो वै नामरूपयोर्निर्वहिता
ते यदन्तरा तद्ब्रह्म तदमृतं स आत्मा । छां ८।१४।१

प्रतिबोधविदितं मतममृतत्वं हि विन्दते के, २।४

स य एषोऽणिमैतदात्म्यमिदं सर्वं तत्
सत्यं स आत्मा तत्त्वमसि । छां. ६।८।७

स यो ह वै तत्परं ब्रह्म वेद ब्रह्म एव भवति । मुं. ३।२।६

एकात्मप्रत्ययसारं प्रपञ्चोपसमं शान्तं
शिवमद्वैतं आत्मा । मां. ७.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आत्मैव संविशत्यात्मनात्मानं य एवं वेद। मां. १२

क्रतुमयः पुरुषः। छां. ३।१४।१

चेत्यानुपातरहितं सामान्येन च सर्वगम्।

यच्चित्तत्त्वमनाख्येयं स आत्मा परमेश्वरः॥ म, ४।१६

तस्मिन् नित्ये तते शुद्धे चिन्मात्रे निरुपद्रवे।

शान्ते शमसमाभोगे निर्विकारे चिदात्मनि॥ म.४।१२०

यैसा स्वभावाभिमतं स्वयं संकल्प्य धावति।

चिच्चैत्यं स्वयमम्लानं मननान्मन उच्यते॥ म ४।१२१

मनसा मन आलोक्य वृत्तिशून्यं यदा भवेत्।

ततः परं परब्रह्म दृश्यते च सुदुर्लभम् यो.शि. ६।६२

चित्तं चलति संसारो निश्चलं मोक्ष उच्यते। यो.शि.६।५८॥

अधिष्ठाने परेतत्वे कल्पिता रज्जुसर्पवत्। अन्न. ४।१०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सम्यगालोकनात्सत्याद्वासना प्रविलीयते ।
वासनाविलये चेतस्सम्समायोति दीपवत् ॥ मु. २।१७

दृढ़भावनया त्यक्तपूर्वापरविचारणम् ।
यदादानं पदार्थस्य वासना सा प्रकितिंता ॥ मु. २।५८

दृढाभ्यस्तपदार्थैकभावनादतिचञ्चलम् ।
चित्तं संजायते जन्मजरामरणकारणम् ॥ मु. २।२५

वासनाऽऽवेशतः प्राणस्पन्दस्तेन च वासना ।
क्रियते चित्तबीजस्य तेन बीजाङ्कुरक्रमः ॥ मु. २।२६

द्वे बीजे चित्तवृक्षस्य प्राणस्पन्दनवासने ।
एकस्मिंश्च तयोः क्षीणे क्षिप्रं द्वे अपिनश्यतः ॥ मु. २।२७

असङ्गव्यवहारत्वाद्भवभाव नवर्जनात्।
शरीरनाशदर्शित्वाद्वासना न प्रवर्तते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वासनासंपरित्यागाच्चित्तं गच्छत्यचित्तताम् ।। मु. २।२८

अवासनत्वात्सततं यदा न मनुते मनः ।
अमनस्ता तदोदेति परमोपशमप्रदा ।। मु. २।२९

यत्र देशे वसेद्वायुश्चित्तं तद्वसते ध्रुवम् । यो. शि. ६।६९।।
सदा नादानुसन्धानात् संक्षीणा वासना भवेत् ।
निरञ्जने विलीयेते मरुन्मनसि पद्मज यो. शि. ६।७१
यो वै नादः स वै बिन्दुस्तद्वै चित्तं प्रकीर्तितम् ।
नादो बिंदुश्च चित्तं च त्रिभिरैक्यं प्रसाधयेत्।। यो.शि.६।७२
मन एव हि बिन्दुश्च उत्पत्तिस्थितिकारणम् ।
मनसोत्पद्यते बिन्दुर्यथा क्षीरं घृतात्मकम् ।। यो. शि. ६।६७
अविनाभाविनी नित्यं जन्तूनां प्राणचेतसी । अन्न.५।५२।।
आधाराधेयवच्चैते एकभावे विनश्यतः । अन्न.५।५३।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संवेद्यसंपरित्यागात् प्राणस्पन्दनवासने ॥
समूलं नश्यतः क्षिप्रं मूलच्छेदादिव द्रुमः । अन्न. ४।५४
निरञ्जने विलीयेते मनोवायू न संशयः । ना. बि. ५०॥
यत्पुरुषो मनसाऽभिगच्छति तद्वाचा वदति
तत्कर्मणा करोति । बृ. जा. १।१।१
मनो हि द्विविधं प्रोक्तं शुद्धश्चाशुद्धमेव च ।
अशुद्धं कामसंकल्पं शुद्धं कामविवर्जितम् ।। मै. ४।६
लयविक्षेपरहितं मनः कृत्वा सुनिश्चलम् ।
यदा यात्यमनोभावं तदा तत्परमं पदम् ।। मै. ४।७
निरस्तविषयासङ्गं संनिरुद्धं मनो हृदि ।
यदा यात्यात्मनोऽभावं तदा तत्परमं पदम् ।। अ.बि. ४
तावदेव निरोद्धव्यं हृदि यावत् क्षयं गतम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एतज्ज्ञानं च मोक्षश्च शेषास्तु ग्रन्थविस्तराः ॥ मैं. ४।८

अयं सोऽहमिदं तन्मे ए तन्मात्रकं मनः ।

तद्भावनमात्रेण दात्रेणेव विलीयते ॥ मं ४।९४

यत्रैवैष चमत्कारस्तमाश्रित्य स्थिरो भव । म. ४।९५॥

काममय एवायं पुरुष इति स यथा कामो

भवति तत्क्रतुर्भवति यत्क्रतुर्भवति

तत्कर्म कुरुते यत्कर्म कुरुते तदभिसंपद्यते ॥ वृ.आ. ४।४।५

योऽकामो निष्काम आप्तकाम आत्मकामो न

तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन्ब्रह्माप्येति। वृ.आ.४।४।६

ब्रह्मणः सकाशान्नानाविचित्रजगन्निर्माण

सामर्थ्या बुद्धिरूपा ब्रह्मशक्तिरेव प्रकृतिः । नि. ६

ब्रह्मत्वं मे सदा नित्यं सच्चिदानन्दरूपतः । स.र. ४६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रकृतित्वं ततः स्पृष्टं सत्त्वादिगुणसाम्यतः ।
सत्यसाभाति चिच्छाया दर्पणे प्रतिविम्बवत् ॥स.र. ४७
प्रकृत्यवच्छिन्नतया पुरुषत्वं पुनश्च ते । स.र.४८॥
तत्प्रतिविम्बितं यत्तत्साक्षिचैतन्यमासीत् । पैं. १।२
अव्यक्तात्तु पुरुषो व्यापको ऽलिङ्ग एवच । क. २।३।८
ज्ञातृज्ञानज्ञेयानामाविर्भावतिरोभावज्ञाता स्वयंमा
विर्भावतिरोभावरहितः स्वयं ज्योतिः साक्षीत्युच्यते । स.सा.६
सत्त्वप्रधाना प्रकृतिर्मायेति प्रतिपाद्यते । स.र.४९॥
अनादिरन्तवर्ती प्रमाणाप्रमाणसाधारणा
न सती नासती न सदसती स्वयमधिका
विकार रहिता निरूप्यमाणा सतीतरलक्षण
शून्या सामायेत्युच्यते । स.सा। १५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शुद्धसत्त्वप्रधानायाम्मायायां विम्बितो ह्यजः । स.र.४९॥
सा माया स्ववशोपाधिः सर्वज्ञस्येश्वरस्य हि ।
वश्यमायित्वमेकत्वं सर्वज्ञत्वं च तस्यतु । स.र.५०
सात्त्विकत्वात्समष्टित्वात्साक्षित्वाज्जगतामपि ।
जगत्कर्तुमकर्तुं वा चान्यथा कर्तुमीशते ।
यः स ईश्वर इत्युक्तः सर्वज्ञत्वादिभिर्गुणैः ॥ स. र. ५१
शक्ति द्वयं हि मायाया विक्षेपावृतिरूपकम् ।
विक्षेपशक्तिर्लिङ्गादि ब्रह्माण्डान्तं जगत्सृजेत्॥ स. र. ५२
ईशाधिष्ठिताऽऽवरणशक्तितो रजोद्रिक्ताऽमहदाख्या
विक्षेपशक्तिरासीत् तत्प्रतिविम्बितं
यत्तद्धिरण्यगर्भचैतन्यमासीत् ।
स महत्तत्त्वाभिमानी स्पष्टास्पष्टवपुर्भवति । पैं. १।५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विक्षेपशक्तितस्तमोद्रिक्तादहङ्काराभिधा
स्थूलशक्तिरासीत् ।
तत्प्रतिविम्बितं यत्तद्विराट्चैतन्यमासीत् ।
तदभिमानी स्पष्टवपुः सर्वस्थूलपालको
विष्णुः प्रधानपुरुषो भवति । पैं. २१६

ब्रह्मणोऽव्यक्तमव्यक्तान्महन्महतोऽहंकार
अहंकारात्पञ्चतन्मात्राणि पञ्चतन्मात्रेभ्यः
पञ्चमहाभूतानि पञ्चमहाभूतेभ्योऽखिलं जगत् । त्रिशि. ३
तानि पञ्च तन्मात्राणि त्रिगुणानि भवन्ति । मैं. २१६
तस्माद्वा एतस्मादात्मनः आकाशः सम्भूतः ।
आकाशाद्वायुर्वायोरग्निः अग्नेरापः अद्भ्यः पृथिवी । तैं. २।१
शब्दस्पर्शरूपरसगन्धाः पृथिवीगुणाः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शब्दस्पर्शरूपरसाश्चापां गुणाः ।

शब्दस्पर्शरूपाण्यग्निगुणाः ।

शब्दस्पर्शाविति वायुगुणौ ।

शब्द एक आकाशस्य । छा० ६

स्रष्टुकामो जगद्योनिस्तमोगुणमधिष्ठाय

सूक्ष्मतन्मात्राणि भूतानि स्थूलीकर्तुं सोऽकामयत ।

सृष्टेः परिमितानि भूतान्येकमेकं द्विधा विधाय

पुनश्चतुर्धा कृत्वा स्वस्वेतरद्वितीयांशैः पञ्चपञ्चधा

संयोज्य पञ्चीकृतभूतैरनन्तकोटिब्रह्माण्डानि

तत्तदण्डोचितचतुर्दशभुवनानि

तत्तद्भुवनोचितगोलकस्थूलशरीराण्यसृजत् । पै. ११७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पञ्चमहाभूतेभ्यो ब्रह्मैकपादव्याप्तमे
कमविद्याण्डं जायते । त्रि.पा. १४ श्म. ६

तत्र तत्त्वतो गुणातीतशुद्धसत्त्वमयो
लीलागृहीतनिरतिशयानन्दलक्षणो
मायोपाधिको नारायण आसीत् । त्रिपा. २।१५

यत्कठिनं सा पृथिवी यद्द्रवं तदापो
यदुष्णं तत्तेजो यत्संचरति स वायुः
यत्सुषिरं तदाकाशम् । शा. १

एतत्संघातं कर्मसञ्चितं त्वगादियुक्तं
बालाद्यवस्थाऽभिमानास्पदं बहुदोषाश्रयं
स्थूलशरीरं भवति. पै. २।२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अपञ्चीकृतमहाभूतरजोंशभागत्रयसमष्टितः
पञ्चवृत्त्यात्मकं प्राणमसृजत् ।
आकाशादिरजोगुणतुरीयभागेन
कर्मेन्द्रियाण्यसृजत् ।
एवं भूतसत्त्वांशभागत्रयसमष्टितोऽ
न्तःकरणमसृजत् । पैं. २।३
मनोबुद्धिरहङ्कारश्चित्तमित्यन्तःकरणचतुष्टयम् ।
सङ्कल्पविकल्पाऽध्यवसायाऽभिमानाऽ
वधारणस्वरूपाश्चैते विषयाः । शा. ४
भूतसत्त्वतुरीयभागेन ज्ञानेन्द्रियाण्यसृजत् । पै. २।३
सत्त्वसमष्टित इन्द्रियपालकानसृजत् । पै. १।१०
बुद्धिकर्मेन्द्रियप्राणपञ्चकैर्मनसा धिया ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शरीरं सप्तदशभिः सूक्ष्म तल्लिङ्गमुच्यते । प्रां. १६

आकाशांशाः अन्तःकरणमनोबुद्धिचित्ताहंकाराः ।

वाय्वंशाः समानोदानोव्यानापानप्राणाः ।

वह्न्यंशाः श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाः ।

आपांशा शब्दस्पर्शरूपरसगन्धाः ।

पृथिव्यंशाः वाक्पाणिपादपायूपस्थाः । त्रि. शि.

अस्थिचर्मनाडीरोममांसाश्चेति पृथिव्यंशाः ।

मूत्रश्लेष्मरक्तशुक्रस्वेदा अवंशाः ।

क्षुतृष्णाऽऽलस्यमोहमैथुनान्यग्नेः ।

प्रचारणविलेखनस्थूलाक्ष्युन्मेषनिमेषादिवायोः ।

कामक्रोधलोभमोहभयान्याकाशस्य । शा. ५

बुद्धेः पूर्णविकाशोऽयं जागरः परिकीर्त्यते । ब. शा. २।६०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सूक्ष्मनाडिषुसंचारो बुद्धेः स्वप्नः प्रजायते । व.रा. २।६१॥
अज्ञाने बुद्धिविलये निद्रा सा भण्यते बुधैः । व.रा. २।५६॥
ज्ञानेन्द्रियकर्मेन्द्रियान्तःकरणचतुष्टयं
चतुर्दशकरणयुक्तं जाग्रत् ।
अन्तःकरणचतुष्टयैरेव संयुक्तः स्वप्नः ।
चित्तैककरणा सुषुप्तिः ।
केवलजीवयुक्तमेव तुरीयमिति । शा. १४
स्वरूपाज्ञानमानन्दमयकोशस्तत्कारणशरीरम् । पै. २।४
अहंकारकलात्यागे समतायाः समुद्गमे ।
विशरारौ कृते चित्त तुर्यावस्थोपतिष्ठते । अन्न. ५।११
यः सर्वेषु भूतेषु तिष्ठन्सर्वेभ्यो भूतेभ्योऽन्तरो
यं सर्वाणि भूतानि न विदुर्यस्य सर्वाणि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भूतानि शरीरं यः सर्वाणि भूतान्यन्तरो।

यमयत्येष त आत्माऽन्तर्याम्यमृतः। बृ. आ. ३।७।१५

अदृष्टो द्रष्टाऽश्रुतः श्रोताऽमतो मन्ता ऽविज्ञातो

विज्ञाता नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति श्रोता

नान्योऽतोऽस्ति मन्ता नान्योऽतोऽस्ति विज्ञातैष

त आत्माऽन्तर्याम्यमृतोऽतोऽन्यदार्तम्। बृ. आ. ३।७।२३

कूटस्थोपहितभेदानां स्वरूपलाभहेतुर्भूत्वा

मणिगणे सूत्रमिव सर्वं क्षेत्रेष्वनुस्यूतत्वेन

यदा काशते आत्मा तदन्तर्यामीत्युच्यते। स. सा. ११

तदा जडान्यपि तानि चेतनवत्स्वस्व

कर्माणि चक्रिरे। पै. १।११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वज्ञेशो मायालेशसमन्वितो व्यष्टिदेह

म्प्रविश्य तथा मोहितो जीवत्वमगमत् । प. ११२

अन्तःकरणप्रतिविम्बितचैतन्यं यत्तदेव । पैं. २।१०

यद्यद्दृग्दृश्यस्वरूपं सर्वान्तरस्थं सर्वसमं

अविकारं विकारेषु चैतन्यं विना किंचि

न्नास्तीति साक्षात्कारानुभवं ज्ञानम् । नि. १३

रज्जौ सर्पभ्रान्तिरिवाद्वितीये सर्वानुस्यूते

सर्वमये ब्रह्मणि देवतिर्यङ्नरस्थावर

स्त्रीपुरुषवर्णाश्रमबन्धमोक्षोपाधि

नानात्मभेदकल्पितं ज्ञानमज्ञानम् । नि. १४

देहमानं स्वाङ्गुलीभिष्षण्णवत्यङ्गुलायतम् ।

प्राणः शरीरादधिको द्वादशाङ्गुलमानतः । त्रि. शि. ५४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देहस्थमनिलं देहसमुद्भूतेन वह्निना ।
न्यूनं समं वा योगेन कुर्वन्ब्रह्मविदिष्यते । त्रि. चि. ५५
सुखासनस्थो दक्षनाड्या बहिस्थं पवनं समाकृष्या
केशमानखाग्रं कुम्भयित्वा सव्यनाड्या रेचयेत् ।
तेन कपालशोधनं वातनाडीगत सर्वरोगविनाशनं
भवति । शा. १।७।१३-१
अक्षरं परमो नादः शब्दब्रह्मेति कथ्यते ।
मूलाधारगता शक्तिः स्वाधारा बिन्दुरूपिणी। यो. शि ३।२
यत्र कुण्डलिनी नाम पराशक्तिः प्रतिष्ठिता । यो शि २।१६९॥
तस्यामुत्पद्यते नादः सूक्ष्मबीजादिवांकुरः ।
तां पश्यन्तीं विदुर्विश्वं यया पश्यन्ति योगिनः । यो शि ३।३
हृदये व्यज्यते घोषो गर्जत्पर्जन्यसंनिभः ।
तत्रस्थिता सुरेशान मध्यमेत्यभिधीयते । यो. शि. ३।४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राणेन च स्वराख्येन प्रथिता वैखरी पुनः। यो शि ३।५॥
परायामंकुरी भूयपश्यन्त्यां द्विदलीकृता। यो. कु. ३।१८॥
मध्यमायां मुकुलिता वैखर्यां विकसीकृता।
पूर्वं यथोदिता या वाग्विलोमेनास्तगा भवेत्। यो. कु. ३।१९
तस्या वाचः परोदेवः कूटस्थो वाक्प्रबोधकः।
सोऽहमस्मीति निश्चित्य यः सदा वर्तते पुमान्। यो.कु.३।२०
शक्तिमध्ये मनः कृत्वा मनः शक्तेश्च मध्यगम्। यो.कु.३।४॥.
मनसा मन आलोक्य तत्त्यजेत्परमं पदम्। यो.कु. ३।५॥.
शक्तिमध्ये मनः कृत्वा शक्तिं च मनमध्यगाम्।
मनसा मन आलोक्य शाण्डिल्यत्वं सुखी भव।
खमध्ये कुरु चात्मानमात्ममध्ये च खं कुरु। शां.२।७।१८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वं च खमयं कृत्वा न किंचिदपि चिन्तय। शां. १।७।१९
बाह्य चिन्ता न कर्तव्या तथैवान्तश्चिन्तिका।
सर्वचिन्तां परित्यज्य चिन्मात्रपरमो भव। शां. १।७।२०
कर्पूरमनले यद्वत् सैन्धवं सलिले यथा।
तथा च लीयमानं च मनस्तत्त्वे विलीयते। शां. १।७।२१
ज्ञेयं सर्वप्रतीतं च तज्ज्ञानं मन उच्यते।
ज्ञानं ज्ञेयं समं नष्टं नान्यः पन्था द्वितीयकः॥ शां. १।७।२२
ज्ञेय वस्तुपरित्यागे विलयं याति मानसम्।
मानसे विलयं याते कैवल्यमवशिष्यते॥ शां. १।७।२३
द्वौ क्रमौ चित्तनाशस्य योगो ज्ञानं मुनीश्वर।
योगस्तु वृत्तिरोधो हि ज्ञानं सम्यगवेक्षणम्। शां. १।७।२४
तस्मिन्निरोधिते नूनमुपशान्तं मनो भवेत्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मनः स्पन्दोपशान्त्यायां संसारः प्रविलीयते। यां १।७।२५
सूर्यालोक परिस्पन्दशान्तौ व्यवहृतिर्यथा।
शास्त्रसज्जनसंपर्कवैराग्याभ्यासयोगतः। यां १।७।२६
अनास्थायां कृतास्थायां पूर्वं संसारवृत्तिषु।
यथाऽभिवाञ्छितध्यानाच्चिरमेकतयोदितात्। यां १।७।२७
एकतत्त्वदृढाभ्यासात् प्राणस्पन्दो निरुध्यते।
पूरकाद्यनिलायामादृढाभ्यासादखेदजात। यां १।७।२८
एकान्तध्यानयोगाच्च मनःस्पन्दो निरुध्यते।
ओङ्कारोच्चारणप्रान्तशब्दतत्त्वानुभावनात्।
सुषुप्ते संविदो जाते प्राणस्पन्दो निरुध्यते। यां १।७।२९
प्राणे गलितसंवित्तौ तालूर्ध्वद्वादशान्तगे।
अभ्यासादूर्ध्वरन्ध्रेण प्राणस्पन्दो निरुध्यते। यां १।७।३१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वादशाङ्गुलपर्यन्ते नासाग्रे विमलाम्बरे।
संविद्दृशि प्रशाम्यन्त्यां प्राणस्पन्दो निरुध्यते। यो॰ १७।३२

भ्रूमध्ये तारकालोकशान्तावन्तमुपागते।
चेतनैकतने बद्धे प्राणास्पन्दो निरुध्यते। यो॰ १७।३३

ओमित्येव यदुद्भूतं ज्ञानं ज्ञेयात्मकं शिवम्।
असंस्पृष्टविकारांशं प्राणस्पन्दो निरुध्यते। यो॰ १७।३४

चिरकालं हृदेकान्तव्योमसंवेदनोन्मुने।
अवासनमनोध्यानात् प्राणस्पन्दो निरुध्यते। यो॰ १७।३५

केवलकुम्भकात् कुण्डलिनीबोधो जायते। यो॰ १७।१३।५

अन्तर्लक्ष्यं वहिर्दृष्टिर्निमेषोन्मेषवर्जिता।
एषा सा वैष्णवी मुद्रा सर्वतन्त्रेषु गोपिता। यो॰ १७।१४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अन्तर्लक्ष्यविलीनचित्तपवनो
योगी सदा वर्तते
दृष्ट्या निश्चलतारया बहिरधः
पश्यन्नपश्यन्नपि ।
मुद्रेयं खलु खेचरी भवति सा
लक्ष्यैकताना शिवा
शून्याशून्यविवर्जितं स्फुरति सा
तत्त्वं पदं वैष्णवी । शां १।७।१५
अर्धोन्मीलितलोचनः स्थिरमना
नासाग्रदत्तेक्षण-
श्चन्द्रार्कावपि लीनतामुपनय-
न्निष्पन्दभावोत्तरम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ज्योतीरूपमशेषबाह्यरहितं
देदीप्यमानं परं
तत्त्वं तत्परमस्ति वस्तु विषयं
शाण्डिल्य विद्धीह तत् । शा १।७।१६

तारं ज्योतिषि संयोज्य किंचिदुन्नमय भ्रुवौ ।
पूर्वाभ्यासस्यमार्गोऽयमुन्मनीकारकः क्षणात् । शां१।७।१७

तदभ्यासादखण्डमण्डलाकारज्योतिर्दृश्यते ।
तदेव सच्चिदानन्द ब्रह्म भवति । मं.ब्रा.२।१।७

एवं सहजानन्दे यदा मनो लीयते
तदा शांभवो भवति । मंब्रा. २।१।८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चित्स्वरूपोऽहमिति सदा भावयन्
सम्यङ्निमीलिताक्षः किंचिदुन्मीलिताक्षो
वाऽन्तर्दृष्ट्या भ्रूदहरादुपरि सच्चिदानन्दतेज
कूटरूपं परं ब्रह्मावलोकयन्तद्रूपो भवति। अद्व. २

चित्तादिसर्वभावेषु ब्रह्मत्वेनैव भावनात्।
निरोधः सर्ववृत्तीनां प्राणायामः स उच्यते। ते.वि.१।३१
निषेधनं प्रपञ्चस्य रेचकाख्यः समीरितः।
ब्रह्मैवास्मीति या वृत्तिः पूरको वायुरुच्यते। ते.१।३२
ततस्तद्वृत्तिनैश्चल्यं कुम्भकं प्राणसंयमः।
अयं चापि प्रबुद्धानामज्ञानां घ्राणपीडनम्। ते. १।३३
स्वान्तस्थविषयं सर्वं रेचकं समुदाहृतः।
पूरकं शास्त्रविज्ञानं कुम्भकं स्वगतं स्मृतम्। वरा. ५।५८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषयेष्वात्मतां दृष्ट्वा मनसश्चित्तरञ्जनम् ।
प्रत्याहारः स विज्ञेयोऽभ्यसनीयो मुहुर्मुहुः । ते. ११३४

विलाप्य विकृतिं कृत्स्नां संभवव्यत्ययक्रमात् ।
परिशिष्टं च चिन्मात्रं चिदानन्दं विचिन्तय । मु. २।५०

शब्दादिविषयान्पञ्च मनश्चैवातिचञ्चलम् ।
चिन्तयेदात्मनो रश्मीन्प्रत्याहारः स उच्यते । अ.ना. ५

देहे त्वात्ममतिं विद्वान्समाकृष्य समाहितः ।
आत्मनात्मनि निर्द्वन्द्वे निर्विकल्पे निरोधयेत् । द. ७।१२

अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम् ।
आद्यं त्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम् । स.र. ५८

अपेक्ष्य नामरूपे द्वे सच्चिदानन्द तत्परः ।
समाधिं सर्वदा कुर्य्याद्हृदये वाऽथवा वहिः । स.र. ५९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सविकल्पो निर्विकल्पः समाधिर्द्विविधो हृदि ।
दृश्यशब्दानुभेदेन सविकल्पः पुनर्द्विधा । स. र. ६०
कामाद्याश्चित्तगा दृश्यास्तत्साक्षित्वेन चेतनम् ।
ध्यायेद् दृश्यानुविद्धोयं समाधिः सविकल्पकः । स. र. ६१
असङ्गः सच्चिदानन्दः स्वप्रभो द्वैतवर्जितः ।
अस्मीति शब्दविद्धोऽयं समाधिः सविकल्पकः । स. र. ६२
स्वानुभूतिरसावेशाद् दृश्यशब्दावुपेक्षितुः ।
निर्विकल्पसमाधिः स्यान्निवातस्थितदीपवत् । स. र. ६३
हृदि वा बाह्यदेशेऽपि यस्मिन् कस्मिंश्च वस्तुनि ।
समाधिराद्यः सन्मात्रान्नामरूप पृथक्कृतिः । स. र. ६४
स्तब्धीभावो रसास्वादात् तृतीयः पूर्ववन्मतः ।
एतैः समाधिभिः षड्भिर्नयेत् कालं निरन्तरम् ॥ स. र. ६५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

देहाभिमाने गलिते विज्ञाते परमात्मनि ।
यत्र यत्र मनो याति तत्र तत्र परामृतम् ॥ स.र ६६
अन्तर्दृग्दृश्ययोर्भेदं बहिश्च ब्रह्मसर्गयोः ।
आवृणोत्यपराशक्तिस्सा संसारस्य कारणम् ॥ स.र. ५३
साक्षिणः पुरतो भातं लिङ्गदेहेन संयुतम् ।
चितिच्छायासमावेशाज्जीवः स्याद्व्यावहारिकः ॥ स.र. ५४
अस्य जीवत्वमारोपात्साक्षिण्यप्यवभासते ।
आवृतौ तु विनष्टायां भेदे भातेऽपयाति तत् ॥ स.र. ५५
तथा सर्गब्रह्मणोश्च भेदमावृत्य तिष्ठति ।
या शक्तिस्तद्वशाद्ब्रह्म विकृतत्वेन भासते ॥ स.र. ५६
अत्राप्यावृतिनाशेन विभाति ब्रह्मसर्गयोः ।
भेदस्तयोर्विकारः स्यात्सर्गे न ब्रह्मणि क्वचित् ॥ स.र. ५७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

किञ्चित्क्षुभितरूपा सा चिच्छक्तिश्चिन्महार्णवे । म. ५।११८॥
तन्मयैव स्फुरत्यच्छा तत्रैवोर्मिरिवार्णवे ।
आत्मन्येवात्मना व्योम्नि यथा सरति मारुतः॥ म. ५।११९
तथैवात्मात्मशक्त्यैव स्वात्मन्येवैति लोलताम् ।
क्षणं स्फुरति सा देवी सर्वशक्तितया तथा ॥ म. ५।१२०
स्वस्वभावं विदित्वोच्चैरप्यनन्तपदे स्थिता । म. ५।१२१॥
रूपं परिमितेनासौ भावयत्यविभाविता । म. ५।१२२॥
भावनाऽभावमात्रेण संकल्पः क्षीयते स्वयम् । म. ५।१८३॥
कारणाभिन्नरूपेण कार्यं कारणमेव हि । प. ३७॥
तद्रूपेण सदा सत्यं भेदेनोक्तिर्मृषा खलु ।
तच्च कारणमेकं हि न भिन्नं नोभयात्मकम् । प. ३८॥
अत्र कारणमद्वैतं शुद्धचैतन्यमेव हि । प. ३९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वशक्तेर्महेशस्य विलासो हि मनो जगत्।
संयमासंयमाभ्यां च संसारं शान्तिमन्वगात् म. ४।८७

सर्वं किञ्चिदिदं दृश्यं दृश्यते चिज्जगद्गतम्।
चिन्निष्पन्दांशमात्रं तन्नान्यदस्तीति भावय। म. ४।१०

वैराग्यस्य फलं बोधो बोधस्योपरतिः फलम्।
स्वानन्दानुभवाच्छान्तिरेषैवोपरतेः फलम्। अध्या. २८

नित्यः शुद्धो निरञ्जनो विभुरद्वयः शिव
एकः स्वेन भासेदं सर्वं सृष्ट्वा तप्तायः पिण्डवत्
ऐक्यं भिन्नवत् अवभासते। त्रिशि. २

सत्यं ज्ञानमनन्तं ब्रह्म। तै. २।१

प्रज्ञानं ब्रह्म। ऐ. ३।१

अहं ब्रह्मास्मि। बृ.आ. १।४।१०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विज्ञानमानन्दं ब्रह्म । व आ. ३।६।२८-७

केवलाखण्डबोधः । कु. ३।२

प्रत्यगानन्दं ब्रह्म। आत्म. १

स्वच्छं स्वतस्सिद्धम् । भा.

आदिब्रह्म स्वसंचित । निर्वा. ३५

प्रतिभासत एवेदं न जगत्परमार्थतः ।

ज्ञानदृष्टौ प्रसन्नायां प्रबोधविततोदये ॥ म. ५।१०८

दृश्यं नास्तीतिबोधेन मनसो दृश्यमार्जनम् ।

सम्पन्नं चेत्तदुत्पन्ना परा निर्वाण निर्वृतिः म. २।३८

तत्त्वावबोध एवासौ वासनातृणपावकः ।

प्रोक्तः समाधिशब्देन न तु तूष्णीमवस्थितिः । म. ४।१२

दृश्यासंभवबोधो हि ज्ञानं ज्ञेयं चिदात्मकम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तदेव केवलीभावं ततोऽन्यत्सकलं मृषा । म. ४।६३

प्रज्ञानमेव तद्ब्रह्म सत्यप्रज्ञानलक्षणम् ।

एवं ब्रह्मपरिज्ञानादेव मर्त्योऽमृतो भवेत् । म. ४।८१

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।

क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे ॥ म. ४।८१

चैत्यनिर्मुक्तचिद्रूपं पूर्णज्योतिः स्वरूपकम् ।

संशान्तसर्वसंवेद्यं संविन्मात्रमहं महत् । म. ६।८१

ज्ञात्वा स्वं प्रत्यगात्मानं बुद्धितद्वृत्तिसाक्षिणम् ।

सोहमित्येव तद्वृत्त्या स्वान्यत्रात्ममतिं त्यजेत् । अध्या. २

यस्माच्च बृहति बृंहयति च सर्वं

तस्मादुच्यते परंब्रह्मेति । शां ३।२।२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यस्मात्सर्वमाप्नोति सर्वमादत्ते सर्वमत्ति
तस्मादुच्यते आत्मेति । यां ३।४
चेतनं चित्तरिक्तं हि प्रत्यक्चेतनमुच्यते । सनू. ६।१।।
ब्रह्माकारमनोवृत्तिप्रवाहोऽहंकृतिं विना ।
सम्प्रज्ञातसमाधिस्स्याद्ध्यानाभ्यासप्रकर्षतः । मु. २।५३
ध्यातृध्याने परित्यज्य क्रमाद्ध्येयैकगोचरम् ।
निवातदीपवच्चित्त समाधिरभिधीयते । अ. ध्या. ३५
प्रशान्तवृत्तिकं चित्तं परमानन्ददायकम् ।
असम्प्रज्ञातनामाऽयं समाधिर्योगिनां प्रियः ।। मु. २।५४
प्रभाशून्यं मनःशून्यं बुद्धिशून्यं चिदात्मकम् ।
अतद्व्यावृत्तिरूपोऽसौ समाधिर्मुनिभावितः ।। मु. २।५५
ऊर्ध्वपूर्णमधःपूर्णं मध्यपूर्णं शिवात्मकम् ।
साक्षाद्विधिमुखोह्येषः समाधिः पारमार्थिकः ।। मु. २।५६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वृत्तयस्तु तदानीमप्यज्ञाता आत्मगोचराः ।
स्मरणादनुमीयन्ते व्युत्थितस्य समुत्थिताः ॥ अध्या. ३६

स्वानुभूत्या स्वयं ज्ञात्वा स्वमात्मानमखण्डितम् ।
स सिद्धः सुसुखं तिष्ठन् निर्विकल्पात्मनात्मनि ॥ अध्या. ६५

द्रष्टृदर्शनदृश्यानि त्यक्त्वा वासनया सह ।
दर्शनप्रथमाभासमात्मानं केवलं भज ॥ वरा. ४।२०

स्वात्मनैव सदानन्दरूपेणास्मि स्वलक्षणः । अध्या. ६८॥

स्वानुभूत्येकमानं च यत्तत्त्वं तदसौ स्थितः । अन्न, ३।२३॥.

स्वयं भातं निराधारं ये जानन्ति सुनिश्चितम् । वरा. २।१०॥

शुद्धबोधस्वरूपोऽहं केवलोऽहं सदाशिवः अध्या. ७०॥

केवलं क्षीणमननः आस्तेऽद्वैतेऽतिनिर्भयः । वरा. ४२।१७॥

एकः सन् भिद्यते भ्रान्त्या मायया न स्वरूपतः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आत्मस्वरूपविज्ञानादज्ञानस्य परिक्षयः । द. ६।५०॥
अज्ञानादेव संसारो ज्ञानादेव विमुच्यते ।
ज्ञानस्वरूपमेवादौ ज्ञानं ज्ञेयैक साधनम् । योत. १६
ज्ञातं येन निजं रूपं कैवल्यं परमं पदम् ।
निष्कलं निर्मलं साक्षात्सच्चिदानन्दरूपकम् । योत. १७
उत्पत्तिस्थितिसंहारस्फूर्तिज्ञानविवर्जितम् । यो. १८॥
निर्विकारतया वृत्त्या ब्रह्माकारतया पुनः ।
वृत्तिविस्मरणं सम्यक्समाधिरभिधीयते । ते. १।३७
समाधिः सतु विज्ञेयः सर्ववृत्तिविवर्जितः । त्रि.शि १६२८
ग्राह्याभावे मनःप्राणो निश्चयज्ञानसंयुतः ।
शुद्धसत्त्वे परे लीनो जीवः सैन्धवपिण्डवत्। त्रि. शि. १६४
सिद्धान्तोऽध्यात्मशास्त्राणां सर्वापन्हव एव हि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नाविद्यास्तीह नो माया शान्तंब्रह्मेदमक्लमम् । अन्न.५।११२
आत्मन्येवास्व शान्तात्मा मूकान्धवधिरोपमः ।
नित्यमन्तर्मुखः स्वच्छः स्वात्मनाऽन्तः प्रपूर्णधिः। अन्न५।११५
चित्तसत्ता परंदुःखं चित्तत्यागः परंसुखम् ।
अतश्चित्तं चिदाकाशे नय क्षयमवेदनात् । अन्न. ५।११७
चेतसो यदकर्तृत्वं तत्समाधानमीरितम् ।
तदेवकेवलीभावं सा शुभा निर्वृतिः परा महो. ४।७
चित्ताकाशं चिदाकाशमाकाशं चतृतीयकम्।
द्वाभ्यां शून्यतरंविद्धि चिदाकाशं महामुने । म. ४।५८
यदा मनसि चैतन्यं भाति सर्वत्रगं सदा ।
योगिनोऽव्यवधानेन तदासंपद्यते स्वयम् । द. १०।६
यदा सर्वाणि भूतानि स्वात्मन्येव हि पश्यति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वभूतेषु चात्मानं ब्रह्म संपद्यते तदा। द. १०।१०

यदा सर्वाणि भूतानि समाधिस्थो न पश्यति ।

एकीभूतः परेणासौ तदा भवति केवलः । द. १०।११

यदा पश्यति चात्मानं केवलं परमार्थतः ।

मायामात्रं जगत्कृत्स्नं तदा भवति निर्वृतिः । द. १०।१२

आत्मानं सच्चिदानन्दमनन्तं ब्रह्म सुव्रत ।

अहमस्मीत्यभिध्यायेद्देहातीतं विमुक्तये । द. ९।५

भावाभावविनिर्मुक्तं भावनामात्रगोचरम् । यो.शि. ३।२२॥

भक्तिगम्यं परं तत्त्वमन्तर्लीनेन चेतसा यो.शि. ३।२३॥

यत्तत् संवेद्यते किंचित् तत्रास्था परिवर्जनम् ।

अनास्थैव हि निर्वाणं दुःखमास्थापरिग्रहः । म. ४।१०६

अविद्या यावदस्यास्तु नोत्पन्नाक्षयकारिणी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वयमात्मावलोकेच्छा मोहसंक्षयकारिणी। म. ४।११२
अस्याः परं प्रपश्यन्त्याःस्वात्मनाशः प्रजायते।
दृष्टे सर्वगते बोधे स्वयं ह्येषा विलीयते म. ४।११३
ज्ञप्तिर्हि ग्रन्थिविच्छेदस्तस्मिन् सति विमुक्तता। म. ५।४०॥
समाधौ परमं ज्योतिरनन्तं विश्वतो मुखम्।
तस्मिन्दृष्टे क्रियाकर्म यातायातो न विद्यते। यो. ११३
ततः स्तिमितगम्भीरं न तेजो न तमस्ततम्। यो. कु. ३।२४॥
अनाख्यमनभिव्यक्तं सत्किंचिदवशिष्यते। यो. कु. ३।२५॥
यदज्ञानाद्भवेद् द्वैतमितरत्तत्प्रपश्यति।
आत्मत्वेन तदा सर्वं नेतरत्तत्र चाण्वपि। यो. शि. ४।६
अधिष्ठानं परं तत्त्वमेकं सच्छिष्यते महत् वह्न. ६
अविनाशी वा अरेऽयमात्मानुच्छित्तिधर्मा। बृ. आ. ४।५।१४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अयमात्माऽनन्तरोऽवाह्यः कृत्स्न

प्रज्ञानघन एव । व. आ. ४।५।१३

श्रीशिव उवाच ।

ॐनमस्सच्चिदानन्दाद्वितीयाखण्डब्रह्मणे ।

अचलाय नमोऽजायाऽक्रियकूटस्थविष्णवे । १

अनन्ताय प्रबोधाय नमो ज्योतिस्स्वरूपिणे ।

नमस्ते स्वप्रकाशाय शिवाय परमात्मने । २

जगदाधारभूताय नमो विश्रान्तशात्मने ।

नारायण हृषीकेश वासुदेव नमस्तुते । ३

केशवाच्युत भोः कृष्ण हरे माधव निर्गुणः ।

श्रीराम परमेशान जनार्दन नमोस्तुते । ४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वय्यनन्ते परानन्दे स्वप्रबोधघने यदा ।
सर्गोत्पत्तिविधिज्ञानस्वभावो जायते तदा । ५
गुणानां समतावस्था रज्जौ सर्पवदुत्थिता ।
अधिष्ठानाभिधः साक्षी तद्योगात्पुरुषश्च त्वम् । ६
सत्वद्रेकाच्च सा शक्तिर्मायाऽऽवरण संज्ञिता ।
तत्संबन्धाच्च त्वं विष्णो सर्वज्ञेशनिमित्तिकः । ७
रजोद्रिक्ता च सा माया विक्षेपमहदात्मिका ।
तद्योगाद्धमगर्भस्त्वं क्रियाज्ञानात्मको भवेत् । ८
तमोद्रेकाच्च विक्षेपादहङ्काराभिधा स्मृता ।
तद्योगात्त्वम्भवेद्विष्णो प्रधानपुरुषो विराट् । ९
ततो व्योमानिलाग्न्यम्भूसूक्ष्माणि प्रभवन्ति वै ।
पञ्चीकृततमोभागैरनन्ताण्डानि चित्त्वयि । १०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भुवनानि शरीराणि तत्र त्वं सृजसि प्रभो।
रजोभागभवाः प्राणास्तथा कर्मेन्द्रियाणि च। ११
देवाज्ञानेन्द्रियाण्यन्तःकरणानि च सत्त्वतः।
क्षिप्तानण्डेऽक्षमान्वीक्ष्य तत्संघातान्हि त्वं हरे। १२
तदा चित्प्रतिबिम्बेन प्रवेशोऽविद्यया कृतः।
आवृणोत्यपराभेदं दृग्दृश्योर्ब्रह्मसर्गयोः। १३
स्वाविद्यावसतः कर्त्ता भोक्ता त्वं जीवसंज्ञकः।
एकस्त्वम्बहुधाजातो भोग्यभोक्तृशभेदतः। १४
एवं त्वयि चिदम्भोधौ ब्रह्माण्डादि तरङ्गकाः।
मायावातेरिताः सर्वे तच्छान्तौ ते लयङ्गताः। १५
त्वदुन्मेषनिमेषाभ्यामण्डानाम्प्रभवाप्ययौ।
त्वद्रोमकूपेष्वण्डानि फलान्यौदुम्बरे यथा। १६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उपादानञ्चोर्णनाभिर्ह्येकः स्थूलतया यथा।
लिङ्गदेहतयाऽभिन्ननिमित्तंतन्तुकर्मणि। १७
उपादानम्प्रपञ्चस्य मायामाश्रित्य त्वं तथा।
तत्संस्कारतयाऽभिन्न निमित्तं विश्वकर्मणि। १८
अतोऽभिन्ननिमित्तोपादानं स्वारोपितस्य त्वम्।
मायाविलसितं विश्वं स्यादनिर्वचनीयकम्। १९
स्वरुपात्यागपूर्वेण यद्विशेषेण वचनम्।
तद्वै विवर्त्तकं प्रोक्तं शुक्तिकारजतं यथा। २०
सच्चिदानन्दरुपस्यापरित्यागेन वै तथा।
विश्वाकारेण त्वञ्जातस्ततो विश्वं विवर्तकम्। २१
मृत्तिकादिविकारेषु यथा सत्यं मृदादिकः।
शुक्तिकादि विवर्त्तेषु यथा सच्छुक्तिकादिकाः। २२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथा त्वं चिद्विवर्त्तेषु सत्यं सच्चित्प्रियात्मकः ।
त्वद्विलासमिदं विश्वमासकामस्य बालवत् । २३
बिम्बप्रतिबिम्बाभ्यां यथा बिम्बो द्विधा भवेत् ।
तथेशः जीवरूपौ हि त्वयिनाथ विकल्पितौ । २४
चुम्बकस्य च सान्निध्याद्यथा ह्याकर्षणक्रिया ।
तथा त्वय्यपि कर्तृत्वं विकल्पं न च वास्तवम् । २५
यथा घटमठाकाशौ सङ्गहीनौ निरन्तरम् ।
तथा देहत्रयस्थोऽपि निस्सङ्गस्त्वं चिदात्मकः । २६
रज्जुसर्पे यथा रज्जुर्निर्विकारः प्रवर्तते ।
स्वविवर्त्ते तथा त्वं हि विकाररहितः सदा । २७
सुवर्णकारणाद्भिन्नं यथा हि रूचकं ह्यसत् ।
भवच्चित्कारणाद्भिन्नं वितथं वैजगत्तथा । २८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

युष्मच्चिन्मयैकेऽस्मिन्विवादं कुत्र वै प्रभो ।
त्वयि शुद्धे बन्धमोक्षौ स्वप्नबन्धन मुक्तवत् । २९
त्वं सर्वहृदयस्थो वै त्वयि सर्वं प्रतिष्ठितम् ।
वस्तुतस्त्वं निराधारो वासुदेवपदः स्मृतः । ३०
यथा शुक्ति परिज्ञामाद्रजतन्न प्रवर्तते ।
त्वद्विवर्तमिदं तद्वत्त्वज्ज्ञामाद्वै निवर्त्तते । ३१
त्वन्मूलमखिलं विश्वं त्वत्तो भिन्नं न विद्यते ।
त्वत्कृपालेशमात्रेण सर्वज्ञानाति भक्तिमान् । ३२
त्वद्भक्तिविमुखानां वै ज्ञानं कल्पशतैर्न च ।
तस्मादहं महाविष्णो मृगयामि त्वदङ्घ्रिकम् । ३३
दयार्द्रदृष्टिकटाक्षेण पश्य नाथ दयानिधे ।
शरणागतञ्च मामद्याहि संसार क्लेशसागरात् । ३४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

महाविष्णोरिदंस्तोत्रं यः पठेद्भक्तिसंयुतः ।
वाञ्छितञ्च तथा ज्ञानं तस्य शीघ्रं प्रजायते । ३५

इति शिवरहस्ये श्रीमहाविष्णु स्तोत्रम् ।

श्रीभगवानुवाच ।

ज्ञानं परमगुह्यं मे यद्विज्ञानसमन्वितम् ।
सरहस्यं तदङ्गं च गृहाण गदितं मया । १
यावानहं यथाभावो यद्रूपगुणकर्मकः ।
तथैव तत्त्वविज्ञानमस्तु ते मदनुग्रहात् । २
अहमेवासमेवाग्रे नान्यद्यत्सदसत्परम् ।
पश्चादहं यदेतच्च योऽवशिष्येत सोऽस्म्यहम् । ३
ऋतेऽर्थं यत्प्रतीयेत न प्रतीयेत चात्मनि ।
तद्विद्यादात्मनो मायां यथाभासो यथा तमः । ४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यथा महान्ति भूतानि भूतेषूच्चावचेष्वनु।
प्रविष्टन्यप्रविष्टानि तथा तेषु न तेष्वहम्। ५
एतावदेव जिज्ञास्यं तत्त्वजिज्ञासुनात्मनः।
अन्वयव्यतिरेकाभ्यां यत्स्यात्सर्वत्र सर्वदा। ६
एतन्मतं समातिष्ठ परमेण समाधिना।
भवान्कल्पविकल्पेषु नविमुह्यति कर्हिचित्। ७
इति श्री मद्भागवते द्वितीयस्कन्धे नवमोऽध्याये
चतुः श्लोकी भागवतम् ॥

॥ ब्रह्मस्तोत्रम् ॥

श्री शिवउवाच।
हृदयकमलमध्ये निर्विशेषं निरिहम्
हरिहरविधिवेद्यं योगिभिर्ध्यानगम्यम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जननमरणभीतिभ्रंसि सच्चितस्वरूपम्
सकलभुवनबीजं ब्रह्म चैतन्यमीडे ॥
नमस्ते सते सर्वलोकाश्रयाय
नमस्ते चिते विश्वरूपात्मकाय ।
नमोऽद्वैततत्त्वाय मुक्तिप्रदाय
नमो ब्रह्मणे व्यापिने निर्गुणाय ॥
त्वमेकं शरण्यं त्वमेकं वरेण्यं
त्वमेकं जगत्कारणं विश्वरूपम् ।
त्वमेकं जगत्कर्तृपातृप्रहर्तृ
त्वमेकं परं निश्चलं निर्विकल्पम् ॥
भयानां भयं भीषणं भीषणानां
गतिः प्राणिनां पावनं पावनानाम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

महोच्चैः पदानां नियन्तृ त्वमेकं
परेषां परं रक्षकं रक्षकाणाम् ॥
परेश प्रभो सर्वरूपाप्रकाशिन्
अनिर्देश्य सर्वेन्द्रियागम्यसत्य ।
अचिन्त्याक्षर व्यापकाव्यक्त तत्व
जगद्भासकाधीश पायादपायात् ॥
तदेकं स्मरामस्तदेकं जपामः
तदेकं जगत्साक्षिरूपं नमामः ।
सदेकं निधानं निरालम्बमीशं
भवाम्भोधिपोतं शरण्यं व्रजामः ॥
पञ्चरत्नमिदं स्तोत्रं ब्रह्मणः परमात्मनः ।
यः पठेत् प्रयतो भूत्वा ब्रह्मसायुज्यमाप्नुयात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रदोषेऽदः पठेन्नित्यं सोमवारे विशेषतः।
श्रावयेद्बोधयेत् प्राज्ञो ब्रह्मनिष्ठान् स्वबान्धवान् ॥
इति श्रीमहानिर्वाणतन्त्रे तृतीयोल्लासे ब्रह्मणः स्तोत्रम्

श्रीशिवस्तोत्रम्

श्रीशिव उवाच ।
नमस्ते नाथ भगवन् शिवाय शिवरूपिणे ।
विद्यावतारसंसिद्ध्यै स्वीकृतानेक विग्रह ।
नवाय नवरूपाय परमार्थैकरूपिणे ।
सर्व्वाज्ञानतमोभेदभानवे चिद्घनाय ते ।
स्वतन्त्राय दयाक्लृप्तविग्रहाय शिवात्मने ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परतन्त्राय भक्तानां भव्यानां भव्यरूपिणे।
त्रिवेकिनां विवेकाय विमर्शाय विमर्शिनाम्।
प्रकाशानां प्रकाशाय ज्ञानिनां ज्ञानरूपिणे।
पुरस्तात्पार्श्वयोः पृष्ठे नमस्कुर्यादुपर्यधः।
सदा मे चित्तरूपेण विधेहि भवदासनम्।
इति श्रीतन्त्रराजतन्त्रे प्रथमपटले श्रीशिवस्तोत्रम्

श्रीदेव्यथर्वशीर्षम्

महादेव्यब्रवीत्—अहं ब्रह्मस्वरूपिणी।
मत्तः प्रकृतिपुरुषात्मकं जगत्।
मन्त्राणां मातृका देवी शब्दानां ज्ञानरूपिणी।
ज्ञानानां चिन्मयातीता शून्यानां शून्यसाक्षिणी।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शुद्धि पत्रिका

पृष्ठ	पंक्ति	अशुद्धिः	शुद्धि :
अनुक्रमणिका			
द्वितीय	९	छन्दोग्योपनिषत्	छान्दोग्योपनिषत्
क	३	। श्लोकः	। वा श्लोकः
२	५	वैशारद्दि	वैशारदी
१७	१२		१।७।११
३६	३	सर्व	सर्वं
"	५	योगमश्वरम्	योगमैश्वरम्
"	१०	स्वकमणा	स्वकर्मणा
"	१२	नैष्कम्य	नैष्कर्म्य
३८	२	हृद्धेशें	हृद्देशे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पृष्ठ	पंक्ति	अशुद्धिः	शुद्धिः
३९	३	तदव	तदैव
४०	३	गुराः	गुरोः
,,	८	मताव	मतीव
४१	८	विनिजितात्मा	विनिर्जितात्मा
,,	,,	विमलान्तराशय	विमलान्तराशयः
४२	११	मस्तता	मस्तथा
४३	५	विकृतिरपि	विकृतेरपि
४६	५	प्रकीर्तित	प्रकीर्तितः
४८	७	विमशा	विमर्शा
५०	२	स्वभावमतिमतं	स्वभावमतिमत्
,,	३	द्वयो	द्वयोः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पृष्ठ	पंक्ति	अशुद्धिः	शुद्धिः
५५	५	हृदव्यक्तरूपी	हृद्व्यक्तरूपी
”	९	शिवेच्छासवर्तिनी	शिवेच्छावशवर्तिनी
५९	९	उदाहृत	उदाहृतः
५९	११	१६।६	१६।६६
६०	४	त्यभिधियते	त्यभिधीयते
६०	८	१।९८॥	१८।९८॥
६१	१	ही	हि
६२	५	।’२०	१।५०
६५	२	कार्यंत्वश्रुते	कार्यत्वश्रुतेः
६७	२	सर्पभ्रमथा	सर्पभ्रमो यथा
७६	५	चिद्भ्रमत्	चिद्भ्रमत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पृष्ठ	पंक्ति	अशुद्धिः	शुद्धिः
”	९	विष्मृते	विस्मृते
”	११	मविष्मृते	मविस्मृते
७९	८	सर्वाङ्ग प्रोत	सर्वाङ्गप्रोत
८०	४	गत	गतः
८१	१२	ब्रह्मास्यस्म्यहं	ब्रह्मास्म्यहं
८३	४	ऽमतिभू :	ऽमतिर्भू :
८६	६	६।२-८४	६।२-८४।५॥
८६	९	६।२-८५	६।२-८५।२१॥
८७	७	तन्मुख्य	तन्मुख्यं
”	१०	मात्राखं	मात्रखं
८७	११	६।२-१६।५७	६।२-१०६।५७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पृष्ठ	पंक्ति	अशुद्धिः	शुद्धिः
८८	८	ब्रह्मेथ	ब्रह्मेत्थं
"	१२	चेचति	चेतति
९५	९	विष्यते	शिष्यते
९६	१०	मच्छ ।	मच्छ
९७	१	मात्रं ।	मात्रं
"	४	जाग्रिति	जाग्रति
१००	४	तत्त	तत्तु
१००	६	६।२-२१२।	६।२-२१२।९
१०४	२	गवाक्षाकवत्	गवाक्षार्कवत्
"	३	त्रिपुद्य	त्रिपुड्य
१०६	५	संवितिः	संवित्तिः
"	८		तदेतत्सर्वाकारा महा- त्रिपुरसुन्दरी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पृष्ठ	पंक्ति	अशुद्धिः	शुद्धि :
११४	९	विमुक्त	विमुक्तः
११९	४	नऽऽभासा	नाभासा
,,	५	निस्पन्दान्न	निस्पन्दान्न
१२०	७	विभाता	विभातो
१२१	५	तद्विजिज्ञास स्व	तद्विजिज्ञासस्व
१२२	५	छन्दोग्योपनिषत्	छान्दोग्योपनिषत्
१२६	८	समश्नुत	समश्नुते
,,	११	दप्रमयं	दप्रमेयं
१३४	१०	मनसात्पद्य	मनसोत्पद्यते
,,	२	सतरं.	सततं.
१४१	१	पादव्याप्तमेक	पादव्याप्तमेक
,,	,,	कमविद्याण्डं	मविद्याण्डं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पृष्ठ	पंक्ति	अशुद्धिः	शुद्धिः
१४३	३	वाप्वंशाः	वाय्वंशाः
१५०	१२	रन्ध्रण	रन्ध्रेण
१५२	२	वतंते	वर्त्तते
१५३	१०	शांभवो	शांभवी
१५५	१०	जगद्रुपं	जगद्रूपं
१५६	२	सविकल्प	सविकल्पः
१५८	५	देवा	देवी
१६०	७	प्रसन्नाया	प्रसन्नायां
१६१	६	चैत्यनिमुक्त	चैत्यनिर्मुक्त
१६२	१०	वुद्धिं	वुद्धि
”	१३	हृच्चष	हृच्येष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पृष्ठ	पंक्ति	अशुद्धिः	शुद्धिः
१६३	९	निश्चतम्	निश्चितम्
१६५	१०	सवत्रगं	सर्वत्रगं
१६७	६	यातातो	यातायातो
१६८	९	नमस्तुते	नमोस्तुते
१६९	५	सत्त्वद्रेका	सत्त्वोद्रेका
१७०	९	चिदमोधौ	चिदम्भोधौ
१७२	६	त्वप्यपि	त्वय्यपि
१७५	२	प्रविष्टन्यपि	प्रविष्टान्यपि
,,	११	निरिहम्	निरीहम्
१७७	३	सर्वरूपाप्रकाशिन्	सर्वरूपप्रकाशिन्
,,	६	सदेकं	तदेकं
१८१	३	समतां	समता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu